कार्तिक–मार्गशीर्षौ
वर्षम् – ६८
प्रथमोऽङ्कः
विक्रमाब्दः २०७४
युगाब्दः ५११९
५ नवम्बर २०१७


ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका


एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–




सम्पूजिता महालक्ष्मीः कुर्याद् भारतवासिनाम्।
धनधान्यसमृद्धिं च विश्वदीप्तिं महाफलाम्॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | मातृहत्या | डॉ. ऋषिराजजानी | ७ |
| ५ | पुस्तकसमाचाराः | म.म. देवर्षिकलानाथशास्त्री | ११ |
| ६ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १२ |
| ७ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १४ |
| ८ | यजुर्वेदे मनोविज्ञानम् | डॉ. उषाकिरणयादवः | १५ |
| ९ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | १६ |
| १० | भारतभूमेः सुपुत्राः | अविनाश शर्मा | १७ |
| ११ | नगरवधूः कालिदासश्च | डॉ. रामदत्त शर्मा, डी. लिट् | १९ |
| १२ | मुरारिबापुसूत्राणि | प्रस्तोता - डॉ. हर्षदेव माधवः | २० |
| १३ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २४ |
| १४ | आख्यान-परिचयः | सुमन शर्मा | २५ |
| १५ | सिद्धान्तकौमुद्याः सामाजिकव्यवस्थायाः अध्ययनम् | जगराम मीणा | २६ |
| १६ | सूत्रसाहित्यस्य आश्वलायनगृह्यसूत्रे एका....... | कैलाशचन्द्रबुनकरः | २७ |
| १७ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १८ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाष: 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयलः

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

आयत्तो जगतः समग्रविभवो यस्याः कृपाद्दृष्टिषु,
संसारस्थितिकारिणीमभयदामानर्च यां श्रीहरिः।
यामर्चन्ति विधर्मिणोऽपि धनदां लब्धुं प्रतिष्ठां चिरम्,
पूज्यां सर्वजनैः सुतां जलनिधेर्वन्दामहे तां रमाम्।।

## मासावतरणम्

प्रत्यूषे रविरश्मयः प्रददते सौख्यं सदा कार्तिके,
स्नानार्थं परिमेलयन्ति विमलं गाङ्गं जलं वारिणि।
स्नात्वा तेन जलेन शुद्धवसना गायन्ति गीतं स्त्रियः
राधामाधवयोः स्तुतिं सुमधुरां कुर्वन्ति नृत्यन्ति च।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

कार्तिक-मार्गशीर्षौ
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2074
नवम्बर, 2017
अङ्कः - 1
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# नववर्षारम्भः

...✍ पं. प्यारेमोहनशर्मा

दीपावलिपर्वतः संस्कृतमासपत्रिका भारती नवषष्टितमे वर्षे प्रवेक्ष्यतीति महतो हर्षस्य विषयः। नववर्षप्रवेशावसरे वयं सश्रध्दं तान् पूर्वपुरुषान् सादरं स्मरामो येषां प्रयत्नैः पत्रिकेयं प्रकाशिता। दीपावलिदिनं शुभमितिकृत्वा सुधियः नैकानि संस्थानानि व्यापारिणश्च स्वकीयं प्रतिष्ठानं संस्थानानि च दीपावलिपर्वतः प्रारभन्ते। शुभदिनं मत्वैव बाबासाहब-आप्टेमहोदयाः संस्कृतमासपत्रिकां भारतीं प्रकाशयितुं दादाभाईगिरिराजशास्त्रिणं समादिशन्। ते गिरिराजशास्त्रिणं प्रबन्धसम्पादकपदे न्ययुञ्जत।

यद्यपि तदानीं संस्कृतपत्रिकायाः प्रकाशनमतीव कठिनमविद्यत। परन्तु प्राचीनकालत एव संस्कृतज्ञाः कठिनं कार्यं कर्तुं सदैव तत्पराः संलक्ष्यन्ते। अत एव कौत्सः स्वगुरुं वरतन्तुं चतुर्दशकोटिरूप्यकाणि गुरुदक्षिणायां दातुं प्रायतत सफलश्चाभवत्। अत एव भारतीपत्रिकातः पूर्वमपि जयपुरात् संस्कृतरत्नाकरोऽत्रत्यैर्विद्वद्भिः प्राकाशिषत। महामहोपाध्यायगिरिधरशर्मचतुर्वेदी पं. सूर्यनारायणशास्त्री कविशिरोमणि भट्टमथुरानाथशास्त्रीप्रभृतिभिर्मिलित्वा संस्कृतरत्नाकरप्रकाशनं प्रारब्धम्। पञ्चदशवर्षाणि यावत् तत् पत्रं नैरन्तर्येण समये प्राकाशिष्ट। यावत् तत् पत्रं जयपुरात् प्रकाशितं तावत्-अबाधगत्या निरन्तरं समये प्राकाश्यमुपगतम्। परन्तु तदनन्तरं काश्या विद्वद्भिः वाराणसीतः प्रकाशनं प्रारब्धम्। ततोऽपि षड्वर्षाणि यावत् प्रकाशितं जातम् परन्तु न दीर्घायुष्यमधिगतम्।

अस्तु भारत्याः प्रकाशनाय बाबासाहबआप्टेमहोदया नामाज्ञया विदुषामेका संगोष्ठी राष्ट्रीयस्वयंसेवकसंघकार्यालये समाहूता। तत्र समवेता विद्वांसोऽवदन् संस्कृतपत्रिकायाः प्रकाशनं दुष्करमेव। यतोहि संस्कृते मुद्रका न मिलन्ति अक्षरसंयोजकाः संशोधकाः धनदातारः ग्राहकाः अध्येतारश्च न विद्यन्ते। अतः कथं प्रकाशनं भविष्यति छात्राः तु आङ्लीमेव पठन्ति। संस्कृतध्येतारस्तु मुष्टिमेया एव विद्यन्ते। लेखका अपि न मिलन्ति। विद्वांसोऽध्ययनाध्यापने एव कुशलाः। ग्रन्थग्रन्थिविमोचकाः गुरुकुलक्लिष्टाः शास्त्राध्ययने तु सर्वदा सक्षमा विद्यन्ते परन्तु न लेखने। तत् सर्वं श्रुत्वा कार्यं वा साधयेयं देहं वा पातयेयमिति दृढप्रतिज्ञाः बाबासाहबमहोदया अवदन् भवन्तस्तु स्ववैदुष्यानुसारं लेखान् लिखन्तु। शेषं सर्वमहं साधयिष्यामि। जाते दृढनिश्चये 1950 वर्षे दीपावलिपर्वणि भारतीसंस्कृत-मासपत्रिका प्रकाशिष्ट।

ततश्च सम्पादकः को भवेदिति प्रश्ने समुपस्थिते प्रबन्धसम्पादकाः गिरिराजशास्त्रिणः सुप्रसिद्धविदुषे श्रीसुरजनदासस्वामिने सम्पादकदायित्वमङ्गीकर्तुं प्रार्थयन्। स्वामिमहाभागा दर्शनन्यायव्याकरणसाहित्यशास्त्राणां प्रौढा विद्वांसोऽविद्यन्त। सम्पादनकार्यमपि ते सम्यगजानन्। प्रथमसम्पादकाय जयनारायणव्यासजोधपुरविश्वविद्यालयस्य संस्कृतविभागाध्यक्षपदात् सेवानिवृत्ताय दिवंगताय स्वामिने नववर्षप्रवेशावसरे भारतीपरिवारः सश्रद्धं श्रद्धाञ्जलिं समर्पयति।

तदनन्तरं भारत्याः कविशिरोमणयः साहित्यशास्त्रस्य विलक्षणा विद्वांसः संस्कृतकाव्येषु नवाचारसमारब्धका ग्रन्थग्रन्थिविमोचनकुशलाः भट्टश्रीमथुरानाथशास्त्रिणः प्रधानसम्पादकपदमलञ्चक्रुः। सुप्रसिद्धः संस्कृतसाहित्येतिहासलेखको बलदेवोपाध्यायो भट्टमहोदयानां वैदुष्यमादाय संस्कृतसाहित्यस्य वर्तमानकालं मथुरानाथकालः इत्यजूघुषत्। भवद्भिर्जयपुरवैभवप्रभृतीनि काव्यानि, किन्तोः कुटिलताप्रभृतीनि गद्याख्यानानि हिन्दीभाषाछन्दःसु रुचिराणि मुक्तकानि विरचितानि। भवन्तः सम्पादनकलाकुशला अविद्यन्त। समये पत्रिकाप्रकाशनाय भवद्भिः स्तम्भरचना समारब्धा। विद्वद्भ्यः स्तम्भविशेषस्य लेखप्रेषणाय न्यवेदयन्। एतेन समये लेखाः सम्प्राप्ता अभूवन्। परिणामतः प्रतिमासं निर्धारितसमये पत्रिका प्राकाशिष्ट। पत्रिकाया भाषा सरला भवेदित्यपि भवद्भिः प्रयासो विहितः। अत एव संस्कृताध्येतारश्छात्रा अपि पत्रिकामपठन्। भवतां सम्पादनकार्ये देवर्षिकलानाथशास्त्रिणोऽपि साहाय्यमकार्षुः।

संस्कृतमहाविद्यालयस्य साहित्यविभागाध्यक्षपदात् सेवानिवृत्ताय दिवंगताय श्रीमते भट्टमथुरानाथशास्त्रिणे सश्रद्धं भारतीपरिवारः प्रणामाञ्जलिं समर्पयति।

ततः किञ्चित् कालपर्यन्तं धर्मशास्त्राचार्यः डा. प्रभाकरशास्त्रिणः पितृचरणाः श्रीमन्तो वृद्धिचन्द्रशास्त्रिणः सम्पादकपदमलञ्चक्रुः। संस्कृतमहाविद्यालये धर्मशास्त्र-विभागाध्यक्षपदात् सेवानिवृत्ताय दिवंगताय श्रीमते भारतीपरिवारः सादरं श्रद्धाञ्जलिं समर्पयति।

तदनन्तरमाशुकवयः श्रीहरिशास्त्रिणः संस्कृतमास-पत्रिकां भारतीं समपीपदन्। एते सरसकाव्यान्यरचयन्। वाममार्गोपासका इमे तन्त्रशास्त्रस्य विशेषज्ञा अविद्यन्त। वाराणस्यामायोजितस्याखिलभारतीयतान्त्रिकसम्मेलन-स्याध्यक्षपदं भवन्तोऽलञ्चक्रुः। भगवत्या जगदम्बिकायाः स्तुतिपराणि नैकानि स्तुतिकाव्यानि भवन्तोऽरीरचन्। भगवती जगदम्बा नैकशो भवते प्रत्यक्षदर्शनं प्रायच्छत्। भारत्यां प्रतिमासं मङ्गलाचरणपद्यं मासावतरणञ्च भवन्तोऽलेखिषुः। संस्कृतमहाविद्यालयस्य साहित्यशास्त्रव्याख्यातृत्वपदात् सेवानिवृत्ताय स्वर्गताय भवते भारतीपरिवारः सादरं श्रद्धाञ्जलिं समर्पयति।

एतदनन्तरं पंडितदीनानाथमधुपो भारतीं समपीपदत्। इमे साहित्यन्यायशास्त्रयोः प्रौढा, विद्वांसोऽविद्यन्त। सरसकाव्यनिर्मातार इमे प्रतिमासं मङ्गलाचरणं मासावतरणं चालेखिषुः। भवन्तः स्वयमेवाक्षरशोधनमप्यकार्षुः। संस्कृतमहाविद्यालयस्य व्याख्यातृपदात् सेवानिवृत्ताय दिवंगताय श्रीदीनानाथमधुपाय भारतीयपरिवारः सादरं श्रद्धासुमानानि समर्पयति।

ततः राष्ट्रपतिसम्मानिताः नैषधाचार्याः चलायमान-संस्कृत वाङ्मयकोषाः अस्मद्गुरवः मान्या पं. जगदीशाचार्याः भारत्याः प्रधानसम्पादकपदमलञ्चकुः। महानुभावा इमे सुप्रसिद्धस्य विदुषः पं. वीरेश्वरशास्त्रिणो द्रविडस्य प्रधानशिष्या अवर्तन्त। श्रीवीरेश्वरशास्त्रिणो जगदीशाचार्याय सर्वाणि शास्त्राण्यपाठयन्। अतएव इमे विलक्षणविचक्षणाः शास्त्राणां मूर्तिमन्तः स्वरूपा अविद्यन्त। इमे नैकवर्षाणि यावत् भारतीं समपीपदन्। स्वकीय-सम्पादकीये इमे धर्मशास्त्रसम्बद्धान् लेखानलेखिषुः। मङ्गलाचरणमासावरणपदानि सरसानि सालङ्कराण्यलेखिषुः। पत्रिकाया अक्षरशोधनमपि स्वयमेवाकार्षुः।

पं. रामगोपालशास्त्रिणो धर्मशास्त्राचार्याः एतेषां सहायकाः सम्पादका अभूवन्। महानुभावा इमे संस्कृत-व्याकरणशास्त्रस्याधिकारिणो विद्वांसः अवर्तन्त।

नैकवर्षाणि यावत् भारतीपत्रिकासम्पादकाय वनस्थली-विद्यापीठस्य मानदाचार्यपदात् सेवानिवृत्ताय दिवंगताय गुरुवर्याय श्री जगदीशाचार्याय सश्रद्धं सुमनानि समर्पयामः। सहसम्पादकाय दिवंगताय श्रीरामगोपालशास्त्रिणेऽपि सादरं श्रद्धाञ्जलिं समर्पयामः।

राष्ट्रपतिसम्मानिताः श्रीवाणीअलङ्करणविभूषिताः संस्कृतसाधनाशिखरसम्मानेन सम्मानिता विद्वद्गोष्ठ्यां प्राथम्येन सत्कृताः नैकभाषाभिज्ञाः नवीनतमज्ञाननिधयः संस्कृते नवशब्दनिर्माणकुशलाः प्रवचनपटवः सद्योनिवेदिता पूर्वमपरिचितविषयप्रतिपादने विलक्षणविचक्षणा, नाना-काव्यप्रणेतार, आकाशवाणीदूरदर्शनयोर्माध्यमेन शतशो वार्ताप्रसारकाः नैकसंवादप्रणेतारः सम्पूर्णभारते विद्वद्गोष्ठ्यां सादरं समाहूताः महामहोपाध्यायाः भारतीपत्रिकायाः प्रधानसम्पादकाः प्रतिमासं नवीनसंस्कृतरचनासमीक्षकाः अस्माकं मार्गदर्शकाः देवर्षिकलानाथशास्त्रिणः भारत्याः नवषष्टितमवर्षप्रवेशावसरे दीपावलिपर्वणि भारतीपरिवारेण सादरं सम्मान्यन्ते। वयं भवद्भ्यो दीर्घायुष्यं मङ्गलं च कामयामहे।

भारत्याः नारीस्तम्भलेखिका डा. राजेश्वरीभट्टमहोदया विंशतिवर्षेभ्यो निरन्तरं पत्रिकायां संस्कृतनारीमहत्वप्रदर्शकं प्रेरणादायकं हिन्दीअनुवादसहितं लेखं लिखति। संस्कृत-लेखने भवत्या असाधारणोऽधिकारो विद्यते। भवती लालबहादुरशास्त्री महाविद्यालये चिरमाचार्यपदमलञ्चकार। श्रीमत्या अध्यापनवैशिष्ट्येन भवत्याः कक्षायां शतशश्छात्राः संस्कृतं समनोयोगमध्यगीषत। भवत्याः स्वपत्युः डा. गङ्गाधरभट्टस्मृतौ राजगङ्गाचेरिटेबलनाम्ना न्यासः संस्थापितः। प्रादात् स्वकीयं धनमत्र भवती, शक्त्यनुरूपं न परस्य किंचित् गृह्णाति किं सुमनसां मनसापि किंचित् दानक्षमेण जनेन कदापि लोके। न्यासे सम्प्रति कोटिरूप्यकाणां निक्षेपं भवती विधास्यति। उदारचेता भवती निर्धनानां बालकानां शिक्षणशुल्कं प्रयच्छति विद्यालयीयवस्त्राणि (ड्रेस)

प्रददाति। न्यासद्वारा प्रतिवर्षं एम.ए. संस्कृतपरीक्षायां सर्वाधिकाङ्कप्राप्तकर्त्रे छात्राय पञ्चसहस्ररूप्यकाणि प्रदीयन्ते, इत्थमेव आचार्यपरीक्षायां सर्वाधिकाङ्कप्राप्तकर्त्रे पञ्चसहस्र-रूपयकाणि प्रदीयन्ते। लेखकेभ्य: पुस्तकप्रकाशनाय न्यासो धनं यच्छति। प्रत्यब्दं न्यास अशीतिसहस्ररूप्यकाणि विभिन्न-संस्कृतप्रवृत्तिभ्यो व्ययीकरोति। नववर्षप्रवेशावसरे दीपवलिपर्वणि भारतीपरिवारो भवत्यै दीर्घायुष्यं श्रेष्ठं स्वास्थ्यं मङ्गलं च कामयते।

भारत्या: प्रबन्धसम्पादकपदमलङ्कुर्वन्ति पं. श्रीसुदामाशर्माण:। श्रीमन्त: राष्ट्रीयस्वयंसेवकसंघस्य वरिष्ठा: प्रचारका विद्यन्ते, प्रचारककार्येण सह भारत्या समये सम्यक् प्रकाशनाय सर्वात्मना यतन्ते। समये कर्गदव्यवस्था भवतैव विधीयते। मुद्रकाय मुद्रणादेशं प्रयच्छन्ति। विज्ञापनानि प्राप्नुवन्ति। स्वप्रभावेण दातृभ्य: पत्रिकायै धनं लभन्ते। समये लेखप्रेषणाय लेखकान् निवेदयन्ति। लेखान् प्राप्तुं कर्मचारिणो विदुषां गृहे प्रेषयन्ति। स्वयमपि पत्रिकायै लिखन्ति नवीनग्राहकान् योजयन्ति। यात्रासु भारत्या: प्रचारं कुर्वन्ति स्वयंसेवकेभ्य: संस्कृतस्य महत्त्वं बोधयन्ति। प्रतिमासं पत्रिकां पठितुं प्रेरयन्ति। नववर्षप्रवेशावसरे भारतीपरिवारो भवते दीर्घायुष्यं मङ्गलञ्च कामयते।

अस्माकमायुर्वेदस्तम्भलेखका आयुर्वेदविश्वविद्यालय-स्य कुलपतिचरा: डा. बनवारीलालगौडमहोदया: प्रतिमासमायुर्वेदसम्मतां दिनचर्यां ऋतुचर्यां संस्कृते हिन्द्यां च लिखन्ति। इमे आयर्वेदस्याधिकृता विद्वांसो वर्तन्ते भवन्तो नवीनवैज्ञानिकै: साधनै: विदेशेष्वपि आयुर्वेदशिक्षणं प्रयच्छन्ति। आयुर्वेदस्य महत्वं प्रतिपादयन्ति भवन्त: कुशलशिक्षका: कुशलचिकित्सकाश्च विद्यन्ते। चिकित्सा-कर्मणि निरता इमे सर्वमौषधं स्वगृहे स्वकीयसंरक्षणे पूर्णविधानेन निर्मान्ति। अत एव भवतां चिकित्सया सहस्रशो जना: स्वास्थ्यलाभं प्राप्नुवन्ति। भवतां संस्कृतेऽसाधारणो-ऽधिकारो विद्यते। अत एवायुर्वेदस्य प्रौढसंस्कृतभाषायां लिखितान् ग्रन्थान् भवन्त: सम्यगवगच्छन्ति तदनुसारं च स्वकीयं प्राञ्जलभाषायां दैनिकीं दिनचर्यां वर्णयन्ति।

नववर्षप्रवेशावसरे भारतीपरिवार: दीपावलिपर्वणि भवद्भ्य: दीर्घायुष्यं श्रेष्ठं स्वास्थ्यं मङ्गलं च कामयते। भारत्या अक्षरशोधका: सहसम्पादका: संस्कृतशिक्षा-निदेशकचरा: व्याकरणसाहित्यशास्त्रयो: प्रौढा विद्वांस: पं. सुरेन्द्रकुमार-शर्माण: संस्कृते सरसानि काव्यान्यलेखिषु:। भवन्त: कुशलशासका: कुशलशिक्षका: प्रत्युत्पन्नमतयो विद्वांसो वर्तन्ते। मूललेखेष्वपि समागता अशुद्धी: भवन्त: शोधयन्ति भवतां सहसम्पादकत्वे भारती समये प्रकाशमायाति। दीपावलिपर्वणि भारत्या नवर्षप्रवेशावसरे भारतीपरिवार: भवद्भ्यो दीर्घायुष्यं मङ्गलं च कामयते।

प्रेमचन्द्रराँवकामहोदया: प्रतिमासं भारत्यां सूक्तिसुधां लिखन्ति। एते साहित्यशास्त्रस्य विद्वांसो वर्तन्ते। संस्कृते लेखनाभिरुचिमन्त: श्रीमन्त: भारत्यां नैकवर्षेभ्य: संस्कृते सूक्ती: लिखन्ति वैशिष्ट्यमिदं वर्तते यदेतेअन्वेषणं विधाय प्रतिमासं नवीना सारगर्भिता: सदुपदेशिकासूक्ती: लिखन्ति। जैनग्रन्थेभ्य इमे अनुसन्धानं विधाय सर्वदैव नवीना: सूक्ती: प्रकाशनाय प्रेषयन्ति। भारतीपरिवारो दीपावलिपर्वणि भवते दीर्घायुष्यं श्रेष्ठं स्वास्थ्यं मङ्गलञ्च कामयते।

भारत्या: सहयोगिन: अविनाशमहोदया: राजीवशर्म-महोदयाश्च समये भारतीप्रकाशने तु सर्वात्मना यतन्ते अविनाश: प्रतिमासं लेखान् मुद्रणालये प्रापयति ततश्च प्राथमिकं मुद्रणं शोधकाय प्रयच्छति प्रथमवारं शोधितं पुन: मुद्रणालये प्रयच्छति तत: पुन: शोधितं सहसम्पादकेभ्य: प्रयच्छति। ततस्तं संशोधितं मुद्रणालये प्रापयति अन्तिमं शोधितं प्रधानसम्पादकाय प्रयच्छति। तेषामाज्ञया नियमित-रूपेण मुद्रितुं मुद्रणालये यच्छति। ततश्च समये पोस्ट आफिस कार्यालये प्रयच्छति। दादाभाईपौत्राय अविनाशाय भारती परिवार: दीपावलिपर्वणि शुभाशीर्वादान् प्रयच्छति। परिवारसहितायास्मै मङ्गलञ्च कामयते।

राजीव: स्वकर्मणि दक्ष: समागतान् पत्रान् धारयति ततश्च समये प्रत्युत्तरं प्रेषयति। दूरभाषं शृणोति कोषकार्यालये धनं संस्थापयति। भारतीपरिवार: दीपावलिपर्वणि नववर्ष-प्रवेशासरे भवते शुभाशिष: मङ्गलं च कामयते।

अन्येभ्यो लेखकेभ्यो विज्ञापनदातृभ्यश्च भारती नववर्ष-प्रवेशावसरे शुभकामना: मङ्गलं च कामयते जीवने साफल्यं च कामयते। शुभम्

लघुकथा

# मातृहत्या

❑ डॉ. ऋषिराजजानी

दक्षिणे हस्ते जलं दर्भं च गृह्णातु। यज्ञोपवीतं दक्षिणस्कन्धे धारयतु। अपि च यथा अहं वदामि तथैव मनसा सङ्कल्पमनुवदतु... अत्राद्य... कश्यपगोत्रस्य कृष्णानामकप्रेतस्य प्रेतत्वविमुक्तिपूर्वकाक्षय्यस्वर्गलोक-प्राप्तिकामः प्रेतस्य द्वादशाहे मासिकश्राद्धारम्भनिमित्तं विष्णोः पूजनमहं करिष्ये।

अधुना पात्रे जलम् अर्पयतु। ब्राह्मणः यन्त्रवद् इदं सर्वं वदति। अभिनवः तथा करोति।

नदीतीरे नैकाः घट्टाः सन्ति। नदी क्षुभितचित्ता प्रवहति। नदीतटयोः विविधसमूहेषु ब्राह्मणाः यजमानैः सह उपविष्टाः सन्ति। कुत्रचित् तर्पणविधिः कुत्रचित् क्षौरविधिः, कुत्रचित् पितृयागः, कुत्रचित् नारायणबलि-श्राद्धः, अन्यत्र नीलोत्सर्गः अपि च पिण्डदानविधिः इत्थं विधिपरम्परा सर्वत्र दृश्यते। समीपे एकः पुरातनः शिवालयः वर्तते। तत्र बहिर्भागे द्वित्राः पुरातना अश्वत्था इति। तेषां शाखाः मन्दिरभित्तिं विदार्य बहिर्निर्गताः। मन्दिरस्य नातिदूरे द्वित्राः लघुका आपणाः सन्ति यत्र पूजावस्तूनि लभ्यन्ते। केचिद् ब्राह्मणा यजमानार्थं प्रतीक्षमाणाः लोलुपदृष्ट्या तिष्ठन्ति। यदा घट्टं प्रति कमपि जनं आगच्छन्तं पश्यन्ति तदा ते सर्वे तं प्रति धावन्ति रुन्धन्ति च। अपि च 'मम समीपे आगच्छतु। अहं सम्यक् विधिं कारयिष्यामि। कस्य मृतकस्य कृते कं विधिं कारयितुमिच्छति भवान्?' इति वदन्तः ते यजमानं कर्षन्ति। ब्राह्मणाः कतिपयक्षणानन्तरं पूजाविधेः कृते कालं, पूजासामग्रीं, दक्षिणां च निर्धार्य यजमानं नयन्ति। तदनतरं यजमानः ब्राह्मणेन सूचितमापणं गत्वा पूजासामग्रीं क्रीणाति।

अभिनवस्य मातुः कृष्णादेव्याः अद्य द्वादशाह-श्राद्धमस्ति। अभिनवः चिरं यावत् ग्रामं त्यक्त्वा नगरे वसति किन्तु मातुः निधनवशात् पञ्चदशदिवसावकाशं प्राप्य ग्राममागतः। यद्यपि स्वीयसेवायां (Private Job) पञ्चदशदिवसावकाशो लब्धुं दुष्करो वर्तते किन्तु अधुना ग्रामे आगमनं वारं वारं कस्माद् भविष्यति इति विचिन्त्य स ग्रामे द्वित्रानधिकान् दिवसान् ग्रामे यापयितुं विचारयति। अभिनवस्य ज्येष्ठभ्राता प्रदीपः ग्रामे कृषिकार्यं करोति। माताऽपि ग्रामे प्रदीपेन सह न्यवसत् किन्तु दीर्घरुग्णतावशात् सा पञ्चत्वं गता। यावन् माता जीविताऽऽसीत् तावत् पर्यन्तं अभिनवः ग्रामेण सह संलग्न आसीत् इति स अन्वभवत्। अन्यथा भगिनीभ्रातृभ्यां सह अभिनवेन सम्बन्धविच्छेदो बहुकालात् पूर्वमेव कृतः। अधुना मातुः मरणोत्तरक्रियायाः कृते अन्तिमवारं स सपरिवारं ग्रामम् आगतोऽऽस्ति। स्वभागस्य भूमिखण्डः तेन पूर्वमेव विक्रीतः। अतः ग्रामे पुनरागमनस्य प्रश्न एव कुतः ? सरित्तटे अभिनवः मातृश्राद्धविधौ उपविष्टोऽस्ति। अग्रजः प्रदीपः ब्राह्मणैः सह पूजासामग्रीं वस्तुजातं च यथास्थानं स्थापयति। अन्ये पञ्चषा वृद्धसम्बन्धिनः परिवारजनाः च श्राद्धविधिं पश्यन्ति। मुख्यपुरोहितो दक्षिणदिशं प्रति उपविश्य दर्भासनं स्थापयति। काँश्चित् शुद्धान् कतिपयान् अशुद्धान् च मन्त्रान् स भणति किन्तु सर्वतः अन्येषामपि महान् कलकलः वर्तते अतः ब्राह्मणस्य अशुद्धीः प्रति न कोऽपि लक्ष्यं ददाति कालान्तरे पुरोहितः वारं वारं विविधं वस्तुजातं दातुम् आदिशति-काले काले तिलान्, पञ्चामृतम्, घृतम् इत्यादिकम्। सहायकाः ब्राह्मणाः तस्मै तत्तद् वस्तु ददति। अभिनवः ब्राह्मणस्य आज्ञानुसारं श्रद्धापूर्वकं विधिं करोति। किन्तु तस्य मनसो व्यग्रतां न कोऽपि जानाति। बहुवारं पुरोहितः द्विवारं वदति तदा स सावधानो भवति। स विचारमूढो ह्यन्यमनस्कः प्रतिभाति।

कतिपयक्षणानन्तरं ब्राह्मणाः यज्ञकुण्डं स्थापयन्ति। पश्चात् ते प्रारभन्ते...

**'ॐ पावकनाम्ने अग्नये नमः।**

**ॐ अग्नये स्वाहा।**

**इदम् अग्नये न मम।'**

ॐ इन्द्राय स्वाहा। इदं इन्द्राय न मम। ब्राह्मणाः वारं वारं घृतं, तिलान्, यवान्, काष्ठानि-इत्येतत् सर्वं जुह्वन्ति। काष्ठैः सह गोशकृत्खण्डान् क्षिप्त्वा वह्निवृद्धिं कुर्वन्ति। यज्ञकुण्डात् सर्वतः गाढधूमः प्रसरति। अयं धूमः अभिनवस्य नेत्रयोः मातुः आकृतिं सृजति।

धूमातिरेकोऽभवत् पाकशालायाम्। चैत्रवैशाखयोः तीव्रातपे मृत्तिकाच्छदयुक्तं गृहं दग्धमभवत्। अपि च माता चूल्यग्निं वर्धयितुं फूत्कारं करोति स्म। समग्रपाकशालायां धूमवलया वृद्धिं गच्छन्ति स्म, तत्र श्वसितुमपि दुष्करमासीत्। माता दिवसपर्यन्तं क्षेत्रे कार्यमकरोत् अपि च रात्रौ उष्णरोटिका अखादयत्। ततोऽप्यधिकं श्वश्र्वाः पत्युश्च अविरतमाज्ञापालनं तस्याः कर्तव्यमासीत्। त्रयाणां बालकानां पालनं, पोषणं, शिक्षणं एतत् सर्वमपि तस्या दायित्वमासीत्। पितामही मातुः कृते श्वश्रूर्नासीत्, किन्तु मातृसदृशी आसीत्। किन्तु पितामही तां न वधूं किन्तु कर्मकरीममन्यत। तथापि माता सस्नेहं पितामहीं मृत्युपर्यन्तं पर्यचरत्। मातुः पित्रा सह सम्बन्धः तादृश एवासीत्। माता स्वपतिं परमेश्वरममन्यत किन्तु पिता तु मातुः स्वामी भूत्वा गृहे न्यवसत्। एकदा शाके लवणं न्यूनमासीत् तदा पिता कठोरवचनैः मातरमतर्जयत्। पिता सम्बधिनां समक्षमपि मातुः अपमानं करोति स्म। किन्तु माता अपमानानि पतिपरमेश्वरस्य प्रेमैव अमन्यत।

''यजमान ! अधुना घृताहुतिं ददातु।'' मुख्यपुरोहित आदिशति। अभिनवस्य नेत्राभ्यां स्मृतयः धूमवलयैः सह पुरोऽपसरन्ति। मुख्यपुरोहितो वदति,

''अधुना यदा अहं 'स्वाहा' इति उच्चारणं करोमि तदा वह्नौ घृताहुतीर्ददातु...''

**ॐ नारायणाय स्वाहा।**

**ॐ विष्णवे स्वाहा....।**

अभिनवः घृतपात्रं ध्यानपूर्वकं पश्यति। पुनः तस्य मनः पुराणस्मृतिषु घनीभवति।

''इयन्मात्रस्य घृतस्य व्ययः कस्मात्। घृतं विना मूल्यं न प्राप्यते। घृतस्य मूल्यं किं तव पिता ददाति ? एवंविधं कलहं वारं वारं पिता करोति स्म। पिता स्वभावकृपण आसीत्। पिता कमपि अतिथिमपि खादयितुं नैच्छत्। अल्पमात्रं वस्तुजातं स गृहे आनयत्। पितुः व्ययकलहात् मातुः स्थाल्यां रोटिकाः घृतविहीनाः भवन्ति स्म। किन्तु माता यदा बालकान् पर्यवेषयत् तदा घृतस्निग्धा रोटिकाः अददात् अवदत् च, 'घृतं खादन्तु बालकाः।' घृतेन शक्तिः वर्धते। बलं वर्धते बुद्धिश्च वर्धते। बुद्धिविकासं विना अध्ययनं न शक्यम्। यद्यपि बालकानाम् स्थालीषु घृतधारां दृष्ट्वा पिता व्यग्रजीवोऽभवत्, किन्तु बालकानां विषये माता सदैव मनस्विनी आसीत्। माता अल्पशिक्षिता आसीत् किन्तु यत् किञ्चित् सा पठनं लेखनं च अजानात्, तस्यां धार्मिकसंस्कारा आसन्। ग्रामस्य व्रतसङ्कीर्तनोपवासकथासु मातुः उपस्थितिअनिवार्या आसीत्। सदैव प्रातःकाले माता द्वौ पुत्रौ पुत्रीं च शालां प्रति नयति स्म। मार्गार्धे मन्दिरे दर्शनं कारयति स्म। मातुः इच्छा त्रीणि अपत्यानि बहु पाठयितुं आसीत्। किन्तु गृहस्य आर्थिकस्थितिवशात् प्रदीपः अष्टमीकक्षामुत्तीर्य पठनम् अत्यजत्। पिता षष्ठीकक्षायाः पश्चात् पुत्र्याः जयायाः पठनं अवारोधत्। माता विरोधं प्रदर्शितवती तदा पिता अवदत्, 'पठनेन किं प्रयोजनम्? रोटिकापाचनं शिक्षय। भविष्यत्काले रन्धनकलैव आवश्यकी' किन्तु मातुः स्वप्न आसीत् यदभिनवः स्नातकः भवेदिति।

''यजमान! अधुना यज्ञः पूर्णो जातः। एकस्मिन् पात्रे मुष्टिमितान् अक्षतान् गृहीत्वा पाचयितुं रक्षतु। कतिपयक्षणानतरं पिण्डाः कर्तव्याः। अधुना तर्पणं करोतु।'' मुख्यपुरोहितः विचारमग्नम् अभिनवं दृष्ट्वा वदति, 'अञ्जलौ जलं गृहीत्वा यदा अहं' 'तृप्यतु' इति

वदामि तदा दक्षिणहस्तात् जलं मुञ्चतु। इत्युक्त्वा पुरोहितः जलं कृष्णतिलान् च निक्षिपति।

‘‘**विष्णुस्तृप्यतु।**’’

‘‘**गोविन्दस्तृप्यतु।**’’

पुरोहितः तर्पणमन्त्रान् ब्रवीति। अन्यस्मिन् कोणे ज्येष्ठः भ्राता प्रदीपः अक्षतान् पचति। मन्दाग्नौ उष्णभक्तस्य सुगन्धः सर्वत्र प्रसरति।

आम्.... ईदृशः एव सुगन्धः मातुः पक्वपायसात् प्रासरत्। यदा अभिनवस्य परीक्षायाः अन्तिमो दिवसो भवति स्म, तदा माता प्रातःकाले पायसं पचति स्म अपि च शीतलीकर्तुं जलपात्रमध्ये रक्षति स्म। यदा परीक्षां समाप्य सः गृहं आगच्छति स्म तदा सः पायसान्नं नितरां खादति स्म। तेन पायसेन स व्यपगतश्रमः भवति स्म। अभिनवः एवं द्वादशकक्षायाम् उत्तीर्णो जातः। पत्या सह कलहं कृत्वा माता अभिनवं वाणिज्यविद्याभ्यासार्थं (B.Com.) नगरं प्रेषितवती। प्रतिसप्ताहं माता दूरभाषं कृत्वा अभिनवस्य कुशलं पृच्छति स्म। यदा अभिनवः B.Com. उपाधिं लब्धवान् तदा माता अतीव प्रसन्ना जाता। तपसः स्वप्नो भूतार्थो जातः। अभिनवः शीघ्रमेव एकस्मिन् बैन्ककार्यालये आजीविकां लब्धवान्। तस्मिन् दिवसे माता ब्राह्मणभोजनम् अकारयत् अपि च समग्रे ग्रामे पिण्डकान् व्यतरत्।

‘‘अधुना तर्पणं पूर्णं जातम् इदानीं भक्तेन एकं गुरुपिण्डं रचयतु। तत्पश्चात् अवशिष्टस्य भक्तस्य त्रीन् च समानान् विभागान् करोतु। अपि त्रीन् समानान् पिण्डान् रचयतु।’’ मुख्यपुरोहितस्य वाक्यानि तस्य कर्णयोः प्रतिध्वनितानि। किन्तु त्रीन् ‘‘समानान् विभागान् करोतु’’ इति तस्य हृदये भल्लवत् प्रविष्टम्।

सः कथं इयन्मात्रः परिवर्तितः ? सेवां प्राप्य ग्रामीणः अभिनवः किं नगरस्य भाषां वदति स्म ? यदा पिता तं विवाहार्थं कन्याम् अन्वेषयितुम् आहूतवान् तदा सः निषेधं कृतवान्। स नगर एव पल्लव्या सह प्रणयविवाह-मकरोत्। विवाहोत्तरम् अभिनवस्य विश्वं परिवर्तितम्। अल्पशिक्षिताः कुटुम्बिजनाः तस्मै न अरोचन्त। एकदा ग्रामात् प्रदीपस्य दूरभाषः आगतः यत् ‘पितुः देहान्तो जात’ इति। मरणेच्छानुसारं सर्वसम्पत्तिं माता अप्राप्नोत्। किन्तु माता सर्वं धनसञ्चयं त्रीन् विभागान् कृत्वा पुत्र्यैः च पुत्राभ्याञ्च अददात्। स्वस्याः कृते सा न किञ्चिदपि स्व्यकरोत् यतः सा इच्छानां सर्वबन्धनेभ्यो मुक्ताऽऽसीत्। तदा अभिनवः क्षेत्रस्य त्रीन् समानान् विभागान् कर्तुं हठाग्रहमकरोत्। यद्यपि अभिनवः आर्थिकदृष्ट्या समृद्ध आसीत् तथापि सः स्वभागस्य क्षेत्रं प्राप्य विक्रेतुमैच्छत्। प्रदीपः तत्क्रेतुम् ऐच्छत् किन्तु अभिनवः अधिकधनार्थम् अन्यस्मै क्षेत्रमददात्। एवं कर्तुं स पल्लव्याः प्रेरणावशात् विवशो जातः। अभिनवस्य ग्रामेण सह सम्बन्धः समाप्तिं गत इति जयाप्रदीपौ पूर्वमेव अजानताम् किन्तु माता कदापि न ज्ञातवती यत् ‘मम अभिनवः कस्मात् परिवर्तितः इति।’ माता वारं वारं तं दूरभाषं कृत्वा अपृच्छत् यत् त्वं गृहं कदा आगमिष्यसीति? किन्तु अभिनवः प्रतिवारं केनापि मिषेण ग्रामगमनं न्यवारयत्। शनैः शनैः माता व्याधिग्रस्ता जाता। ‘कोलेस्टेरोल’ रक्तचापवृद्धिवशात् सा रुग्णा जाता। एकदा प्रदीपस्य दूरभाषः आगतो यत् चिकित्सकः हृदयशल्यक्रियायाः कृते नगरं मातरं नेतुम् असूचयत्। प्रदीपस्य वृत्तान्तं श्रुत्वा अभिनवः महति सङ्कटे पतितः। बहुवर्षाणि यावत् स्वैराचारेण जीवित्वा सहसा तयोः जीवनशैल्यां परिवर्तनं आगच्छेदिति ताभ्यां नारोचत। अभिनवः ‘सप्ताहानंतरं’ ‘मासानंतरं’ ‘द्विमासानंतरं’, ‘ग्रीष्मावकाशे’ इति मिषेण प्रदीपस्य कथनं न्यषेधयत्। माता निरन्तरं रुग्णा जाता। सहसा त्रयोदशदिवसेभ्यः पूर्वं प्रदीपः दूरभाषेण अकथयत् यत् माता हृदयरोगाक्रमणेन पञ्चत्वं गतेति। अभिनवस्य हस्ताभ्यां दूरभाषः निपतितः। माता अतिरुग्णा आसीत् किन्तु स मातुः शल्यक्रियां कारयितुं नाशक्नोत्। मातुः समीपे तस्याः कुशलं प्रष्टुमपि नागच्छत्।

‘‘अधुना गुरुपिण्डस्य त्रीन् भागान् कृत्वा त्रिभिः

पिण्डैः सह मिश्रीकरोतु। अपि च बद्धांजलिः भवान् प्रणमतु। अधुना शय्यादानं, दीपदानम् अपि च ब्रह्मभोजनं कारयितुं सङ्कल्पं करोतु।''

''शय्यादानम् - अभिनवस्य मनसि प्रश्नाः जाताः, किं तेन सङ्कल्पेन? यदा माता मृत्युशय्यायामासीत् तदा अहं तस्याः परिचर्यां नाकरवम्। अधुना किं सर्वदानैः माता तृप्ता भविष्यति? मातुः अग्निसंस्कारसमये प्रदीपोऽवदत् यत् मृत्युकाले माता त्वामेव स्मरति स्म।'' अभिनवस्य कपोलात् केचिद् अश्रुबिन्दवः नीचैः सरन्ति। अभिनवः ब्राह्मणेभ्यः दक्षिणां ददाति।

मुख्यपुरोहितो वदति, 'गच्छतु... एतान् पिण्डान् नदीजले विसृजतु। द्वादशाहस्य श्राद्धे सम्पन्ने प्रेतात्मनो मुक्तिर्भवति इति।'

अभिनवः पिण्डान् नदीजले विसृजति। माता वस्तुतस्तु संसारबन्धनेभ्यः सदा मुक्ताऽऽसीत्। केवलं तस्याः मातृत्वं तां संसारे धारयति स्म। अधुना सा तस्मादपि मुक्ता। अभिनवः नदीप्रवाहे तिष्ठति। स स्वस्य प्रतिबिम्बं जले पश्यति। स्वस्य अतीतस्य अभिनवं द्रष्टुं सः व्यवसायं करोति। कतिपयक्षणान्नतरं स मुख्यपुरोहितस्य समीपे आगच्छति। पुरोहितः वदति, ''यजमान! यदि भविष्यत्काले पुनरपि धार्मिकविधिं कारयितुम् इच्छा भवेत् तदा मां स्मरतु। विवाह-लघुरुद्र-सत्यनारायणकथा-पितृश्राद्धादिकं किञ्चिदपि कर्म....।'' अभिनवः कतिपयक्षणान् यावन् मूकभावेन तं पश्यति। सहसा वदति, 'आम् ! मातृहत्यायाः पातकस्य कृते कोऽपि विधिः अस्ति वा ? अहं कारयितुमिच्छामि' इति। अभिनवः क्षुभितहृदयः शनैः शनैः प्रतिनिवर्तते। पुरोहितः दिङ्मूढो भूत्वा तम् अनिमेषदृष्ट्या पश्यति।

**8, राजतिलक बंगलोज, आबादनगर,**
**बसस्टोप के पास, बोपल, अमदाबाद-380058**

*भारती के सभी पाठकों को दीपावली की हार्दिक शुभकामनाऐं*

**राकेश कुमार खण्डेलवाल**
**9829060582**
**राजेन्द्र कुमार खण्डेलवाल**
**9829060317**



**रामअवतार खण्डेलवाल**
**9829064377**
**श्यामसुन्दर खण्डेलवाल**
**9829044661**

**रामेश्वर खण्डेलवाल 9829056741**
**20-21, जय जवान कॉलोनी, टोंक रोड़, जयपुर**

**संरक्षक**
श्री बलराम सत्संग मंडल ट्रस्ट (रजि.) जयपुर

**उपाध्यक्ष**
1. विद्या भारती राजस्थान क्षेत्र
2. योग क्षेम सेवा न्यास राजस्थान
3. श्री रामानन्द सन्त सेवा न्यास गलता घाटी, जयपुर

**अध्यक्ष**
1. विद्याभारती जनशिक्षा न्यास राजस्थान
2. भारतीय जन सेवा प्रतिष्ठान राजस्थान
3. श्री बलराम भारतीय शिक्षा समिति
4. श्री बलराम दास जी जन्मशताब्दी समारोह समिति
5. श्री आमण माता सेवा समिति
6. श्री आमेरिया चैरीटेबिल ट्रस्ट जयपुर

**ट्रस्टी** : 1. श्री रामानन्द आश्रम, गोवर्धन 2. श्री राम तपस्थल प्राचीन राममंदिर ब्रह्मपुरी (हरिद्वार)

पुस्तकसमाचाराः

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# राष्ट्रीयसंस्कृतपुस्तकमेलकं परामर्शोपसमितिश्च

''नेशनल बुक ट्रस्ट'' नाम्ना 1957 ई. वर्षे भारत-राजधान्यां देहल्यां स्थापितो राष्ट्रीयपुस्तकन्यासो विविधानां पाठकहितकारिणां पुस्तकानां प्रणयनम्, अनुवादं, प्रकाशनं च कुरुते, पुस्तकमेलकान्यायोजयति, पत्रिकाः प्रकाशयति, भारतीयेषु पुस्तकप्रेमाणं संवर्धयतीति सुविदितं तथ्यम्। अस्य हि शतशः प्रकाश-नानि गौरवमेधयन्ति भारतस्य। अस्य परामर्शसमितिषु कार्यकारिसमितिषु च संस्कृतविद्वांसोऽपि साहचर्यम-न्वतिष्ठन् सर्वदा किन्त्वस्मिन् काचन स्वतत्रा संस्कृत-परामर्शोपसमितिर्नाऽभूद् घटिता। अस्मिन् वर्षे तादृश्युपसमितिरप्यस्थाप्यत, इदंप्रथमतया राष्ट्रीय-संस्कृतपुस्तकमेलकमपि वाराणस्यां समायोज्य-तेत्याह्लादकं वृत्तम्। 9 सितंबर 2017 दिनाङ्कतः 17 सितंबरपर्यन्तमिदं मेलकं संस्कृतपुस्तकानां शताधिका-स्वास्थानिकासु प्रदर्शनं विक्रयं चाकार्षीत्, राष्ट्रनिर्माणं संस्कृतसंस्कृतिश्चेति विषयमवलम्ब्य प्रदर्शनीमेकां प्रादर्शयत्, कार्यशालानां, विद्वत्संगोष्ठीनां, कथाकथनानां चाऽऽयोजनमकरोत्। वेदकालादारभ्याधुनिककाल-पर्यन्तं भारतीया विज्ञानसम्पत् कथं संस्कृते निहिता दृश्यते इत्यस्य प्रदर्शनमप्यायोज्यत। ''गांधीतत्त्व-शतकम्'' इत्यस्य न्यासप्रकाशनस्य (संस्कृतग्रन्थस्य) लोकार्पणमकारि।

उत्तरप्रदेशराज्यपालः श्रीरामनायकः, संस्कृताऽऽ-योगाध्यक्षचरो विद्वत्प्रवरः डॉ. सत्यव्रतशास्त्री, दिल्लया ला.ब. शा. राष्ट्रियसंस्कृतविद्यापीठकुलपतिः डॉ. रमेश-कुमारपाण्डेयः, काशीहिन्दूविश्वविद्यालयमहात्मागाँधी काशीविद्यापीठादीनां चापि कुलपतयः, अन्ये च प्रतिष्ठिता विद्वांसो मेलकावसरे विविधेषु गतिविधिषु समवायन्ता अस्मिन्नेव मेलकाऽवसरे संस्कृतपरामर्शो-पसमितेरप्यधिवेशनमिदंप्रथमतया समघटत (10 सितंबरदिवसे) यत्र डॉ. सत्यव्रतशास्त्रिरमेशकुमार-पाण्डेयप्रभृतयः समुपस्थाय देशे संस्कृतप्रोत्साहनो-पायानामनुचिन्तनमकार्षुः। उपसमिता-व-स्यामन्ये विद्वांसोऽपि डॉ. पीयूषकान्तदीक्षित, डॉ. कामेश्वर उपाध्याय, श्री श्रीनिवासबारखेडी, प्रो. कोसलेन्द्रदास, प्रो. शङ्कर नेने, श्री जनार्दन हेगडे, डॉ. श्रीनिवासराव-प्रभृतयः सम्मिलिताः सन्ति। प्रो. कोसलेन्द्रदासो राजस्थानसंस्कृतविश्वविद्यालये दर्शनविभागीयः प्राध्यापकोऽस्ति। उपासमितिरियं न्यासेऽस्मिन् संस्कृत-पुस्तकप्रणयनप्रकाशनादिकार्याणामुपोद्बलनं विधास्यतीत्याशास्यते।

विश्वसंस्कृतसंमेलनाद्यवसरेषु तु विश्व-संस्कृत-पुस्तकमेलकादीनामायोजनं क्रियते एव, किन्त्विदं-प्रथमतया स्वतन्त्रस्य राष्ट्रीय संस्कृत पुस्तकमेलकस्या-स्यायोजनं प्रशंसितं विद्वद्भिः, राष्ट्रीयपुस्तकन्यासाध्यक्षः श्री बलदेवभाईशर्मा, निदेशकपदस्था डॉ. रीता चौधरी च वर्धापितौ द्वावपि। इत्थं हि प्राचीनतमायाममरभाषाया-मस्यां पुस्तकप्रणयनस्य या प्राचीनतमा परम्पराऽस्ति, पुस्तकचर्चायाश्च यः सहस्राब्दीव्यापीतिहासोऽस्ति तस्य स्मरणमेवंविधान् समाचारानवधार्य संजायत एव। भारतेऽद्यापि, कम्प्यूटरयुगेऽस्मिन्नपि, समस्तेष्वञ्चलेषु सहस्रशः संस्कृतपुस्तकानि प्रणीयन्ते, प्रकाश्यन्ते च, शतशः संस्कृत-पत्रिकाः प्रकाश्यन्ते इत्यस्माकं सौभाग्यम्। स्थितिरियं क्रमशो नाऽपक्षीयेत इति प्रार्थयामश्चराचरनियन्तारम्।

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# लिङ्गानुशासनकोषः

विश्वस्य प्राचीनतमायां समृद्धतमायां परिष्कृततमायां च संस्कृतभाषायां बहवो विशेषाः सन्ति, दश लकाराः, तेष्वात्मनेपदपरस्मैपदादिभेदाः, पुंलिङ्गः नपुंसकलिङ्ग स्त्रीलिङ्गादिभेदा इत्यादयः। हिन्द्यां लिङ्गद्वयमेव भवति ''मैंने ग्रन्थ पढा है,'' मैंने पुस्तक पढी है इत्यत्रैकस्मिन् वाक्ये पुंलिङ्गप्रयोगः, अपरस्मिन् स्त्रीलिङ्गप्रयोगः किन्तु संस्कृते पुस्तकं पठितम्, ग्रन्थः पठितः, पुस्तिका पठिता इति लिङ्गत्रयं भवति। सर्वेषां ज्ञानं विना न पारयति शुद्धं संस्कृतं लिखितुं भाषान्तराभिज्ञः। अतः संस्कृतस्य कुशला अध्यापकाः सन्धिं, समासं, लकारांश्च पाठयन्तो लिङ्गज्ञानं विशेषतः कारयेयुरित्यावश्यकम्।

स्मरामि कतिपयवर्षपुरातनीं घटनां यदा प्रसिद्धे एकस्मिन् संस्कृतमासिकपत्रे विदुषैकेन लेखो लिखितोऽभूत् ''धन्योऽयं परीक्षायुगः।'' एतदुपरि भूयांसो विवादा जिज्ञासाश्च प्रादुरभूवन्, ''परीक्षायुगम्'' शब्दः साधुः उत ''परीक्षायुगः'', अथवा द्वावपि साधू ? एवंविधानां जिज्ञासानां शमनाय लिङ्गानुशासनोपरि विशिष्टमवधानमावश्यकम्। ''अमरकोष'' स्य तु अपरं नामैव ''नामलिङ्गानुशासनम्'' इत्यस्ति। एवंविध-मार्गदर्शनाय जयपुरस्य सुप्रथितेन राष्ट्रपतिसम्मानितेन विद्वन्मूर्धन्येन डॉ. नारायणशास्त्रिकाङ्करमहाभागेन ग्रन्थ एकः प्रणीतोऽस्ति ''पाणिनीय लिङ्गानुशासनकोष'' नाम्ना।

महर्षिपाणिनिना ''लिङ्गानुशासनसूत्राणि'' विलिखितानि येषु के पुंलिङ्गशब्दाः के नपुंसकलिङ्ग-शब्दा, के स्त्रीपुंसयोः प्रयुक्ताः, के पुंनपुंसकयोः, के चाऽवशिष्टा अर्थात् अव्ययाः (लिङ्गनिरपेक्षाः), सर्वनामानि (लिङ्गानुसारीणि) इत्यङ्कितम्। पाणिनिना सर्वप्रथमं स्त्रीलिङ्गशब्दा लिङ्गानुशासने निर्दिष्टा इति महिला-माहात्म्यसूचकं तथ्यमत्र मयोल्लिख्यते। इदं लिङ्गानुशासनं छात्रोपकारि विधातुं डॉ. काङ्करमहाभागेन सर्वान् शब्दान् वर्णक्रमानुसारं सूचीकृत्य, प्रतिशब्द-मष्टाध्यायीसूत्रोल्लेख-पूर्वकं तेषां व्युत्पतिकोषप्रयोगाः अन्ये सन्दर्भाः साधनिका च सूचिता। अनेन के शब्दा द्विलिङ्गा इत्यपि स्फुटीभवति पूर्वमेव। अन्ते पाणिनीय-लिङ्गानुशासनसूत्राण्यप्युद्धृतानि, वर्णक्रमानुसारिणी अनुक्रमणिकाऽपि मुद्रिता।

विद्वत्प्रवेरण डॉ. नारायणकाङ्करेण छात्राणामुपकाराय वर्णक्रमानुसारं उणादिपदानुक्रमकोषोऽपि प्रणीतोऽभूत् प्रकाशितश्चाऽयम्। अयं लिङ्गानुशासनकोषोऽपि छात्राणामध्यापकानां च सुतरामुपकारको भवेदिति स्पष्टमेव। यद्यपि सिद्धान्तकौमुद्यादिग्रन्धेषु पर्यन्ते यथाऽष्टाध्यायी मुद्रिता भवति बहुषु, तथा लिङ्गानुशासन-सूत्राण्यपि मुद्रितानि दृश्यन्ते किन्तु तेषामारटनमध्यापनं च न सम्भवति। वर्णक्रमानुसारी कश्चन कोषो यदि प्रस्तूयते तर्हि तस्य प्रयोगः सुविधाजनको भवत्येव। अतोऽस्य कोषस्य प्रणेतारः प्रकाशकाश्च डॉ. नारायणशास्त्रि- काङ्करवर्याः साधुवादैरभिनन्द्यन्ते।

एवंविधेष्वपि कोषेषु युगशब्दः पुंलिङ्गे साधुरुत नपुंसकलिङ्गे, अथवा लिङ्गद्वये इति समस्यासमाधानं नोल्लिखितं शक्यते द्रष्टुं यतः पाणिनिना स्वकीयेषु लिङ्गानुशासनसूत्रेषु ''युग'' शब्दो नोपदिष्टः, परवर्तिभि-रमरकोषादिभिरेव तद्विषये कश्चित् सङ्केतो दत्तो यमादाय कुशला अध्यापका, लेखकाश्च छात्राणां पाठकानां च मार्गदर्शनं कर्तुं क्षमेरन् इति विनोदपूर्णा स्थितिरप्यत्र मयोल्लिख्यते। अतो यदि ''युग'' शब्दोऽस्मिन्नपि कोषे न सम्मिलित इत्यत्र न किमप्याश्चर्यं, न काऽपि विसङ्गतिः। नास्ति स पाणिनीयलिङ्गानुशासनसूत्रेषु इति स्पष्टं तस्य कारणम्।

एवविधानां विषयाणां विवेचका ग्रन्था अद्य सुतरामपेक्ष्यन्ते। अतः सर्वात्मना स्वागतं विधास्यते ग्रन्थस्यास्यापि।

**पाणिनीयलिङ्गानुशासनकोषः रचयिताः- डॉ. नारायण शास्त्री काङ्करः प्रका. सौ. इन्दुशर्मा विद्यावैभव, भवन 29 केसरविहार, जगतपुरा, जयपुर पृ.सं. 365 मू. 500/-.**

**महाभारतकथाऽऽधारितं नाटकम्**

विविधानां नाटकानां काव्यानां च प्रणेतुः, राजस्थाने कालाडेराख्योपनगरे प्रायश्चतुर्भिर्वर्षदशकैश्छात्रान् पाठितवतः, कवेरनुवादप्रवीणस्य च पं. साँवरमल-शास्त्रिणो नवीनमेकं नाटकं सपद्येव प्रकाशितमस्ति यत्र सप्तस्वङ्केषु, विभिन्नेषु च दृश्येषु महाभारतीया कथैका समुपनिबद्धा। सुविदिता सेयं कथा यदर्जुनस्यानुपस्थितौ तत्पुत्रस्य सुयोद्धुरभिमन्योश्छद्मरीत्या वधः कौरवसेनायाः सप्तभिर्महारथैर्व्यूहविरचनापूर्वकं कृतो येन सर्वेषां हृदयानि सुभृशं व्यथितानि। एतस्याऽन्यायस्य प्रतीकाराय महारथिनाऽर्जुनेन प्रतिज्ञा कृता अभिमन्युघातकस्य जय-द्रथस्य वधाय। विपरीतास्वपि स्थितिषु तस्याः प्रतिज्ञाया निर्वहणं श्रीकृष्णस्य कृपया समपादि, जयद्रथस्य शिरश्छेदोऽभूत् तच्च शिरस्तत्पितुर्वृद्धक्षत्रस्याङ्के पपात, वृद्धक्षत्रोऽपि ममार इत्यादि। सेयं कथा नाट्यविधायां कथोपकथनद्वारा दृश्यनिर्माणादिसूचनाभिश्च सह ''प्रतीकारनाटकम्'' इत्याख्ये नाटके समुपनिबद्धाऽस्ति।

कथोपकथनेषु स्थाने स्थाने पद्यान्यपि निबद्धानि। अन्तिमे दृश्ये सुतरां परवर्तिनी सा घटनाऽपि निबद्धा यदभिमन्योरुत्तराधिकारी परीक्षितः पर्यन्ते राजमुकुटं धारयति। नाटककारेण प्रारम्भे स्वभूमिकायां तादृशी स्वकीया मान्यताऽपि सूचिताऽस्ति यदेष्वपि दिनेषु प्रतिवेशिदेशीयैर्दुष्टैर्भारतसीमानमतिक्रम्य यथा सैनिकानां शिरांसि छिद्यन्ते, छद्मविधयाऽतिक्रमणादिकं च क्रियते, सर्वस्य तादृशस्योत्पातस्य सुदृढः प्रतीकार एव समुचित उपाय इति महाभारतकालादेवाऽस्माकं मान्यताऽभूत्। अनेन नाटकेन तादृश्येव कांचन प्रतीकारप्रेरणां दर्शकेभ्यः प्रदातुमिच्छति नाटककारः। कथोपकथनेषु कतिपयानि यानि पद्यानि नाटककारेण प्रयुक्तानि तानि न तथा सुप्रयुक्तानि स्युः काव्येषु नाटकेषु वा, विशेषस्तिङन्त-पदानि (यथा व्यदृणाः, सनीस्रस्यते, मा व्याकोलीः, अरुणधम् इत्यादीनि) तेषामवबोधश्छात्रेभ्यः कार्येत इत्युद्दिश्यान्ते परिशिष्टे तादृशानां पदानां वर्णक्रमानुसारि-णी सूची मुद्रिताऽस्ति यत्र धातुप्रत्ययनिर्देशेन सह हिन्द्यनुवादोऽपि तस्य पदस्य सूचितः। अन्यथा सर्वमपि नाटकं संस्कृते एवाऽस्ति।

नूतनस्यास्य प्रकाशनस्योपलक्ष्ये वर्धापयामो नाटककारं पं. साँवरमल शास्त्रिणम्।

**प्रतीकारनाटकम् : ले. साँवरमलशास्त्री, प्रका. सौरभ पब्लिकेशन, झालानियों का रास्ता, किशनपोल बाजार, जयपुरम्, पृ.सं. 150 मू. 195/-**

समस्त देशवासियों को एवं सभी पाठकों को दीपावली की हार्दिक शुभकामनाऐं






के. के. गोयल

K. K. FINANCE

33, उदयपुरिया बाजार, पाली-मारवाड़

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- **एकत्रिंशत्तमः प्रसङ्गः**

# मातृवद् वात्सल्यं गुरुवन्मार्गदर्शनम्

❑ वेणीमाधव गो. धर्माधिकारी

दक्षिणाञ्चल क्षेत्रीयप्रचारका: यादवरावजोशीमहोदया वर्णयन्ति। श्रीमद्भिर्बाबासाहेबआप्टेमहोदयै: सम्बन्ध: 1927 वर्षे समभवत्। तदाहं द्वादश त्रयोदशवर्षीय एवासम्। अहं नागपुरे पठन्नासम्। विद्यालयस्यावकाशदिनेऽहं स्वगृहं उमरेठग्रामे गच्छन्नासम्। स्व. भैयाजी दाणीमहोदया: परशुरामबढिये प्रभृतयोऽपि उमरेठग्रामे आगच्छन्तिस्म।

तेषां माध्यमेनैव मे परिचय: समभवत्। 1929 वर्षस्य घटनास्ति। नागपुरनगरस्य सीमायामेका पर्वतशिखास्ति याहि ''सिग्नेरौहिल्स'' नाम्ना विख्यातास्ति अस्या: सर्वोच्चस्थानं ''स्टाकीपाइन्ट'' नाम्ना ज्ञायते अस्मिन्नेव स्थाने अस्माकं शाखाया: वनविहार कार्यक्रम: समभवत्। परमपूजनीया: द्राक्तरमहाभागाअपि सहैवासन्। श्रीबाबामहोदया अप्यासन् तेषु दिनेषु श्रीमान् भिषीकरेतिनाम्ना विख्यात: एक: स्वयंसेवक: यो हि दिल्लायां महाराष्ट्रभाषाया भांग्लभाषाया श्च श्रेष्ठो लेखक: आसीत्। लेखस्य विषय: ''क्रान्तिकारी कर्त्तारसिंह:'' आसीत्। बाबा महोदयैरोजस्विरूपेण स लेख: पठित:। ततो मे गीतस्य समय आसीत्। प्रसिद्धकवे: गोविन्दस्य महाराष्ट्रभाषायां कविता ''मृत्युदेवताया: प्रार्थना'' गीता मया। तदनन्तरं प्रतिज्ञाविधे: कार्यक्रम: समभवत्। राष्ट्रीयस्वयंसेवक संघस्यायं प्रथम: प्रतिज्ञाविधिकार्यक्रम: आसीत्। वयं पंचनवति स्वयंसेवका आस्म। प्राय: होराद्वयमेव कार्यक्रम: समभवत्। परमपूजनीयै: द्राक्तर-महोदयै: सर्वेभ्य: एव प्रतिज्ञा कारिता। मत्कृते परमपूज्य-द्राक्तरमहोदयै: बाबामहोदयैश्च सम्पर्कस्यायं महत्वपूर्ण: समय आसीत् मयि स्वयंसेवकस्य विकासं प्रति सर्वाधिकं ध्यानं तेषामेवासीत् एतावदध्यानं यन्मह्यं शाखाकार्ये गणवेश-स्यावश्यकतायामहं गणवेशेनिर्माणे ऽसमर्थ आसम्। तदा मम गणवेशनिर्माणं कारयित्वा प्रथमो गणवेश: तैरेव मह्यं प्रदत्त:। तेषु दिवसेषु बाबामहोदया: पंचविंशतिरूप्यकाणि प्रतिमासिके वेतने बीमाकार्यालये कार्यं कुर्वन्तिस्म दशमकक्षायामध्ययनसमयेऽहं तेषामेव समीपे निवसन्नासम्। स्वगृहे केवलं भोजनार्थं गमनं जायते स्म। तेऽपि यदा कदा मम गृहे आगच्छन्ति स्म। रात्रौ ते वीरसावरकररचितं गोमान्तककाव्यं श्रावयन्ति स्म। पुनश्च मे परीक्षाया दिवसा: समागता:। परीक्षा प्रात: सप्तवादनत: भवतिस्म अहँ चतुर्वादन एव प्रबुद्धोंऽभवम्। बाबामहोदया अपि मया सहैवोत्थिता:। परीक्षार्थं गमनात्पूर्वं ते स्वहस्ताभ्यां निर्मितं संयावं (हलुवा) मह्यदत्वा प्रातराशं कारयन्ति स्म।

तेषामस्मिन् स्नेहे यत् मातृवात्सल्यमासीद् गुरुवद-नुशासानमप्यासीदेव। एका घटना मया स्मर्यतेममया एकं प्रार्थनापत्रंमांग्लभाषायां लिखितुं प्रार्थना कृता परं तै: कथितं त्वं लिख अहं संशोधनं करिष्ये। विद्यालये यदापि आंग्लभाषायां प्रार्थनापत्रं देयं भवतिस्म अहं तेरेव लेखयित्वाददम्। तेषामांग्लभाषातीव शुद्धासीत्। परमस्मिन् समये तैर्मह्यमेव लिखितुमाग्रह: कृत:। मय तथा न कृते तै रात्रौ भोजनमपि न कृतम्। मां पश्चात्ताप: समभवत्। अन्ते मयैव लिखितं तैश्च प्रसन्नतया संशोधितेम्।

अस्माकं स्वयंसेवकानां विकासे ते महत्या सावधानतया दृष्टिपातं कुर्वन्तिस्म। एकदा वयं सर्वे तेषां समीपे उपविष्टा: आस्म:। तै: समर्थरामदासस्वामिन: दासबोधस्यैको अंश: श्रावित: कथितं च दासबोधे आचारस्योत्तमं मार्गदर्शनमस्ति सवै: पठितव्यम्। अस्माभि: सर्वैरेव स्वीकृतम् परं पुस्तकं तु नासीत्। तेषां समीपेऽप्येकमेव पुस्तकमासीदपरं क्रेतुं तेऽप्यसमर्था:। अस्माकमिच्छा तैर्गम्भीरतया स्वीकृता। यद्यप्यस्माभिरगम्भीरतया कथितमासीत्। अधुना बाबा-महोदया: प्रतिदिनं त्रिवादनसमये उत्थाय दासबोधस्यैक-मध्यायं लिखित्वा मह्यं ददातिस्म येनाऽहं सर्वेभ्य: क्रमश: वितरेयम् एवं च स्वयंसेवाकानां विकासायातीव श्रमं कुर्वन्ति स्म।

**ब्रह्मपुरी, जयपुरम्**

# यजुर्वेदे मनोविज्ञानम्

❑ डॉ. उषाकिरणयादवः

विश्वेऽस्मिन् सर्वविधज्ञान-विज्ञानस्य प्राप्तेराधार-भूतस्त्रोतांसि वेदाः सन्ति। मनोविज्ञानस्य वर्णनं वेदेषु प्रकीर्णरूपे समग्रसूक्ते च द्विधा प्राप्यते। शिवसंकल्प-सूक्ते इदं वर्णनं सारगर्भितरूपे उपलब्धमस्ति। इदं शुक्लयजुर्वेदस्य चतुस्त्रिंशाध्यायस्य प्रथमसूक्तं विद्यते। सूक्ते षण्मन्त्राः सन्ति। सर्वेषां मन्त्राणां द्रष्टा ऋषिः 'शिवसंकल्पः' अस्ति। ऋषिणा सर्वेषां मन्त्राणां पूववर्तिषु त्रिषु चरणेषु मनसः स्वरूपं महत्त्वं कार्याणि च कथितानि चतुर्थे चरणे च स्वस्य मनसः शिवसकंल्पमयी प्रार्थना कृता 'तन्मे मनः शिवसंकल्पमस्तु' इति। मन्त्रेषु स्थितस्य मनोविज्ञानस्य वर्णनमित्थमस्ति मन एकमात्मनः साधनमस्ति इति तत्रैव विद्यते। तत्रस्थमेव इदमतिदूरं गच्छति मनुष्यान् दूरं गमयति। एतदिन्द्रियाणां प्रकाशकं भवति यज्जाग्रदवस्थायां दूरं धावति सुप्ते चान्तःकरणे समायाति। 1 अनेन धर्मकर्मनिष्ठाः ध्यानिनो धीरार्बुद्धिमन्तः मानवाः योगयज्ञादीनि सत्कार्याणि कुर्वन्ति। इदमपूर्वं पूजनीयमस्ति प्राणिष्वन्तर्विद्यते च। 2 एतद् ज्ञानस्य स्मृतेश्च कारणमस्ति। इदन्धैर्यस्वरूपमात्म-संगतन्नाशरहितं प्रकाशकञ्चास्ति यस्माद् विना किमपि कर्म कर्तुं न शक्यते। 3 आत्मना युक्तेन मनसा भूतवर्तमान-भविष्याणां त्रयाणां कालानां पदार्था ज्ञातुं शक्यन्तेऽनेनैव च सप्तहोत्रात्मको यज्ञो विस्तार्यते। 4 सप्तहोतृषु मुख्यतः पञ्चप्राणाः जीवात्माऽव्यक्त श्चेति गृह्यन्ते।

यथा रथचक्रमध्ये स्थितकाष्ठं परित अरार्विद्यन्ते तथैव मनसि ऋग्वेदो यजुर्वेदः सामवेदश्च सर्वतः स्थिताः सन्ति। सूत्रबद्धमणय इव सर्वं ज्ञानम्मनसि स्थितमस्ति। यथा श्रेष्ठः सारथिः प्रग्रहेणाश्वान् सन्मार्गे गमयति तथैव बुद्ध्या नियन्त्रितं हृदयेऽवस्थितमजरमतिवेगयुतं मनोऽपि सन्मार्गे प्रवर्तितुं शक्यते।6

सूक्तेन ज्ञायते तथ्यमिदं यन्मनसः शिवसङ्कल्पना सहजा शुद्धा न भवतीयं परिश्रमसाध्याऽशुद्धिमिश्रिता च भवति। बह्वायासेन नियन्त्रितमपि मनोऽकस्मादेव कुमार्गगामि भवितुं शक्यते। अर्जुनोऽस्य प्रबलदृष्टान्तो-ऽस्ति यस्य सत्त्वगुणयुतं मनोऽपि क्षणादेव विषादग्रस्तमभवत्। तेनैव मनसः चञ्चलतायाः कथन-मित्थङ्कृतम्- ''चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्। 7'' तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्। जगद्गुरुणा श्रीकृष्णेनास्य मतस्य पुष्टिः कृता- ''असंशयं महाबाहो मनो दुर्निग्रहं चलम्। 8 तेन मनसः निग्रहार्थमुपायोऽपि कथितः अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।। 9'' अभ्यासस्य स्वरूपमिदमुक्तं योगशास्त्रे यन्मनो यत्रापि विचलितं भवति तत्रस्थं मनस्ततः नियम्य आत्माधीनं करणीयम्। 10 मनसः संयमनेनैव योगः समाचरितुं शक्यो भवति। 11 अतः सङ्कल्पानां शिवमय्याः प्रार्थनायाः सार्थकतार्थं मनसो निग्रहोऽप्यनिवार्यो विद्यते। ऋषिभिर्बाह्योपकरणैर्वि-नैवाध्यात्मयोगेनैव वैदिकं ज्ञानमधिगतमिदमतिप्रासंगिकं विद्यते। यतो हि वर्तमानकाले ज्ञानप्राप्तये कर्मसम्पादने च मनसः बहिर्मुखता पराश्रितता च वर्धतेऽनवरतं यया स्मृतेः ह्रासो भवति। मनः संकल्पविकल्पेष्वाबद्धञ्जायते तेषां पूर्तेरभावे नैकाः मनोविकृतयस्तज्जन्याः शारीरिक-सामाजिकप्राकृतिकविकाराश्च दृश्यन्ते सर्वत्र एषां विकाराणां समाधानार्थं शनैः शनैः विकल्पानां संयमः करणीयः। मनः सदा शिवसंकल्पे संलग्नं भवितव्यम् अनियन्त्रितकामआत्मनः शत्रुरस्ति। अयं दुब्लूरणाग्निरिव सर्वविनाशको भवितुं शक्यते।12 शास्त्रानुकूलः काम एव कल्याणकरो भवति। 13 मम मते कल्याणे लौकिकं पारलौकिकञ्च दौ भेदौ समाविष्टौ विद्येते। व्यष्टिरिव समष्टिरपि सहजा विद्यतेऽत्राऽत एव द्विविधा प्रार्थना कृता मनीषिभिः।तन्मे मनः शिवसंकल्पमस्तु।

**''सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।।''**

सन्दर्भाः-

1. यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति। दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु।।

2. येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः। यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु।।

3. यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु। यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु।।

4. येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम्। येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु।।

5. यस्मिन्नृचः सामयजूँषि यस्मिन् प्रतिष्ठिताः रथनाभाविवाराः। यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनःशिवसंकल्पमस्तु।।

6. सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिनऽइव। हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमतु।। यजुर्वेदभाष्यम्। भाष्यकारः महर्षिः दयानन्द सरस्वती, 34/1-6 मन्त्रः

7. श्रीमद्भगवद्गीतायाम्,

8-9. तत्रैव, 6/35

10. यतो यतो निश्चलति मनश्चञ्चलमस्थिरम्। ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्।। तत्रैव, 6/26

11-13. तत्रैव, 6/36, 3/39

**वरिष्ठप्रवक्त्री संस्कृतविभागे,**
**सेमुमाराजकीये स्नातकोत्तरकन्यामहाविद्यालये,**
**भीलवाड़ानगरे-311001 (राजस्थानम्)**

# सूक्ति-सुधा

**अनुवादकः**
❑ **डॉ. प्रेमचन्द्र रांवका,** पूर्व-आचार्यः

**(15 वीं श. आचार्य सकलकीर्तिरचितसुभाषितरत्नावलीतः)**

**चारित्रचलितो जीवो जीवन्नपि मृतोपमः।**
**मृतश्चारित्रसंयुक्तः इहामुत्र च जीवति।।**

-चरित्र से विचलित मनुष्य जीवित रहता हुआ भी मृत के समान है। परन्तु चरित्र से संयुक्त व्यक्ति मृत होकर भी इस लोक और परलोक में जीवित है।।

**इन्द्रियैस्तस्करैर्लोको वराको व्याकुलीकृतः।**
**धर्मरत्नं समाहृत्य मनोराज्ञा हि प्रेरितैः।।**

- निश्चय ही मनरूपी राजा से प्रेरित हुये इन्द्रियरूप चोरों ने धर्मरूपी रत्न को चुराकर बेचारे जगत् को व्याकुल कर दिया है।

**येन वैराग्यखड्गेन हताश्चेन्द्रियतस्कराः।**
**तस्य मोक्षो भवेत्स्वर्गः किं वृथा कायदण्डनैः।।**

- जिसने वैराग्य रूपी तलवार से इन्द्रिय रूपी चोरों को नष्ट कर दिया है, उसको मोक्ष और स्वर्ग अवश्य प्राप्त होता है। बिना वैराग्य के शरीर को दण्डित करने से क्या प्रयोजन है।

**इन्द्रियाणि न गुप्तानि जयं कृत्वा हृदश्च यैः।**
**जिनमुद्रां समादाय तैरात्मा वञ्चितः शठैः।**

- जो पुरुष हृदय को वश में नहीं करके जिनमुद्रा अर्थात् दिगम्बर भेष को धारण करके इन्द्रियों तथा गुप्तियों (मन-वचन-काय) को नहीं जीतता है, वह स्वयं ही मूर्ख पुरुष अपनी आत्मा से वंचित रहता है।

**इन्द्रियाणि न शक्नोति जेतुं यः पुरुषोऽधमः।**
**दीक्षां गृह्णंस्तपः कुर्वन् स किं लोके न लज्जति।।**

- जो अधम पुरुष इन्द्रियों को जीतने में समर्थ नहीं है, वह दीक्षा को ग्रहण करता हुआ तथा तप करता हुआ-क्या संसार में लज्जा को प्राप्त नहीं होता ?

**22, श्रीजी नगर, दुर्गापुरा, जयपुर**

बालोपयोगिनी जीवनवृत्तमाला

# भारतभूमेः सुपुत्राः

❑ अविनाश शर्मा

अशोक : भगवता बुद्धेन यत्र तत्र निवासः स्वजीवने कृतः तत्र तत्र सर्वत्र अशोकेन तीर्थाटनं कृतम्। एषा तीर्थयात्रा नेपालदेशस्य कुशीक्षेत्रे समाप्ताऽभूत्। तदन्तरम् अशोकेन अष्टवर्षपर्यन्तं संन्यस्तजीवनं यापितम्। अशोकस्य व्यक्तित्वं संसारस्य राजपुरुषाणामितिहासे अद्भुतं अपूर्वं चास्ति।

**पुष्यमित्रः** - ईशातः पूर्वं द्वितीयशताब्द्यां मौर्यवंशस्य अन्तिमः सम्राट् बृहद्रथ आसीत्। अस्यासीत् सैन्याधिपतिः पुष्यमित्रः। परकीयाक्रामकाः भारतवर्षं प्रविश्य अस्माकं देशं पारतन्त्र्यशृङ्खलायां निगडयिष्यन्ति इति विलोक्य पुष्यमित्रः बृहद्रथस्य दौर्बल्यं राष्ट्रघातकमस्ति इति च संचिन्त्य अस्य वधं कृत्वा स्वयमेव सम्राट्पदं गृहीतवान्। स च सिन्धुनदपर्यन्तं दिग्विजयं कृत्वा यवनान् पराजित्य च भारताद्बहिः निष्कासितवान्। सिन्धुनदस्य तटे तेन अश्वमेधयज्ञश्च कृतः। अयोध्यायाः शिलालेखे एष उल्लेखो मिलति यत् सम्राजा पुष्यमित्रेण द्विवारम् अश्वमेधयज्ञः कृतः। पुष्यमित्रस्य च विशेषत उल्लेखनीयं कार्यमस्ति वैदिकधर्मस्य पुनरुत्थानम्। सम्राट्पदमलंकुर्वाणोऽपि सः स्वात्मानं सेनापतीत्युपाधिना एव उद्घोषितवान्।

**खारवेलः** - यदा मौर्यसाम्राज्यम् अस्तङ्गतं तदा उत्कलप्रदेशे (कलिङ्गे) एकस्य 'चेत' नामकस्य राजवंशस्योदयोऽभूत्। अस्मिन् राजवंशे खारवेलः तृतीयो नृपतिरासीत्। खारवेलः पञ्चवर्षात्मके वयसि युवराजश्चतुर्विंशतिवर्षात्मके वयसि च अभिषिक्तो महाराजश्च बभूव। तेन स्वसमकालीनाः अनेके शत्रुराजानः पराजिताः। राज्याभिषेकानन्तरं षड्वर्षपर्यन्तं स्वसाम्राज्यस्य सर्वत्र विस्तारं विधाय तेन खारवेलनृपतिना राजसूययज्ञः कृतः। यस्मिन् समये मगधनृपतिना पुष्यमित्रेण सह खारवेलस्य युद्धारम्भोऽभूत् तस्मिन्नेव समये यवनराजेन दिमित्रेण स्वविशालया सेनया सह अस्माकं भारतवर्षस्य मध्यदेशे आक्रमणं कृतम्। इमां राष्ट्रियां विपत्तिं विलोक्य खारवेलः स्वदेशस्य विरोधिना राज्ञा पुष्यमित्रेण सह सन्धिं सम्पाद्य दिमित्रस्योपरि आक्रमणं कृतवान्। खारवेलस्य प्रबल-प्रत्याघातेन पराजितो दिमित्रः पलायितो भूत्वा भारताद्बहिर्निर्गत्य स्वदेशं जगाम। इमं विजयस्य लाभं विलोक्य अत्यधिकप्रभाविताः भारतवर्षस्य समस्ताः भूपतयः खारवेलनृपतये अग्रपूजायाः सम्मानं दत्तवन्तः। शुङ्गसालवाहनं उत्तरापथस्य आक्रमकान् यवनान् च पराजित्य खारवेल-नृपतिना पण्डितानां जैनमुनीनां च एकं महासम्मेलनं समायोजितम्। अत्र महासम्मेलने समागताः विद्वज्जनाः खारवेलमहाराजं ''खेमराजः'' ''धर्मराजः'' इति उपाधिद्वयेन विभूषितवन्तः।

**यशोधर्मा** - पुराणानुसारं यशोधर्मनृपतेः जन्म पञ्चम्यां शताब्द्यां पराशरगोत्रीये ब्राह्मणकुले बभूव। अस्य शिलालेखाः मन्दसोरमण्डले इतस्तो मिलन्ति। अनेनानुमीयते यदस्य राजधानी मन्दसोरनगरी आसीत्। मन्दसोरनगरस्य विजयस्तम्भे यः शिलालेखो वतते, तेन ज्ञायते यदस्य श्रीयशोधर्मनृपतेः साम्राज्यं ब्रह्मपुत्रात् उत्कलप्रदेशस्थित-महेन्द्रपर्वतपर्यन्तं हिमालयाच्च सिन्धुसागर (पश्चिमसागर) पर्यन्तमासीत्। हूणवंशीयो महाक्रूरो मिहिरकुलनामा आक्रामकः अनेन श्रीयशो धर्म-नृपतिना कृतेन प्रत्याक्रमणेन पराजितो भूत्वा स्वदेशं प्रति निवृत्तोऽभूत्। अस्य श्रीयशोधर्ममहाराजस्य नामनिर्देशो विष्णुवर्धनः, हर्षवर्धनः, विक्रमादित्य इत्यादिनामभिरपि पुरातनपुस्तकेषु मिलति।

**समुद्रगुप्तः** - भारतवर्षस्य पुरातनेतिहासे गुप्तवंशस्य असाधारणं महत्त्वमासीत्। श्रीगुप्तः, घटोत्कचः, प्रथमः चन्द्रगुप्तः, समुद्रगुप्तः, द्वितीयः चन्द्रगुप्तः, कुमारगुप्तः, स्कन्दगुप्तः इत्यादीनां महतां राज्ञामुदयः अस्मिन्नेव वंशे बभूव। प्रथमस्य चन्द्रगुप्तस्य धर्मपत्नी कुमारदेवी आसीत् तस्याः गर्भात् श्रीसमुद्रगुप्तो जातः। पाटलिपुत्रे राज्याभिषेकानन्तरं अनेन श्रीसमुद्रगुप्तेन नृपतिना दिग्विजयस्य शुभारम्भः कृतः। प्रयागस्य (इलाहाबादस्य) स्तम्भलेखानुसारेण श्रीसमुद्रगुप्तेन सम्पूर्णमपि भारतम् स्वाधीनं कृतम्। शौर्यस्य-धैर्यस्य विद्वत्तायाः कलाभिज्ञतायाश्च उत्कृष्टैर्गुणैः समुद्रगुप्तस्य व्यक्तित्वं लोकोत्तरं मन्यते। भारताद्बहिर्देशस्थैः नृपतिभिः सहापि अस्य सम्बन्धः आसीत्। दिग्विजयं सम्पाद्य समुद्रगुप्तेन चक्रवर्तित्वस्य निर्देशको अश्वमेधयज्ञः कृतः। अस्य श्रीसमुद्रगुप्तस्य शासनकाले भारतवर्षस्य एतादृशः सर्वंकष उत्कर्षोऽभूत् यदिदं कालखण्डं ऐतिहासिकाः

विद्वांसः ''स्वर्णयुगम्'' इति कथयन्ति।

## हिन्दी अनुवाद

**अशोक :-** भगवान् बुद्ध ने अपने जीवन में जहाँ जहाँ निवास किया वहाँ-वहाँ सब जगह अशोक ने तीर्थाटन किया। यह तीर्थयात्रा नेपाल देश के कुशीक्षेत्र में समाप्त हुई थी। उसके बाद अशोक ने आठ वर्ष तक संन्यस्त जीवन बिताया। अशोक का व्यक्तित्व संसार के राजपुरुषों के इतिहास में अद्भुत और अपूर्व है।

**पुष्यमित्रः** - ईसा से पूर्व द्वितीयशताब्दी में मौर्यवंश का अन्तिम सम्राट् बृहद्रथ था। इसका सैन्याधिपति पुष्यमित्र था। परकीयाक्रामक भारतवर्ष में घुस कर हमारे देश को पारतंत्र्य शृङ्खला में निगडित करेंगे यह देखकर पुष्यमित्र ने बृहद्रथ का दौर्बल्य राष्ट्रघातक है- यह सोचकर इसका वध करके स्वयं ही सम्राट् पद ग्रहण कर लिया। उसने सिन्धुनदपर्यन्त दिग्विजय करके यवनों को पराजित करके भारत से बाहर निकाल दिया। और सिन्धुनद के तट पर उसने अश्वमेध यज्ञ किया। अयोध्या के शिलालेख में यह उल्लेख मिलता है कि सम्राट् पुष्यमित्र ने दो बार अश्वमेध यज्ञ किया। पुष्यमित्र का विशेष उल्लेखनीय कार्य है वैदिक धर्म का पुनरुत्थान। सम्राट् पद को अलंकृत करते हुए भी उसने अपना नाम निर्देश सेनापति-इस उपाधि से ही उद्घोषित किया।

**खारवेलः** - जब मौर्यसाम्राज्य का अस्त हुआ तब उत्कल प्रदेश (कलिङ्ग) में एक चेत नामके राजवंश का उदय हुआ। इस राजवंश में खारवेल तीसरा राजा था। खारवेल पंद्रहवें वर्ष में युवराज और चौबीसवें वर्ष में अभिषिक्त महाराज हुए। उनने अपने समकालीन अनेक शत्रुराजाओं को पराजित किया। राज्याभिषेक के पश्चात् 6 वर्ष तक अपने साम्राज्य का सर्वत्र विस्तार करके उन खारवेल नृपति ने राजसूय यज्ञ किया। जिस समय मगध के राजा पुष्यमित्र के साथ खारवेल का युद्ध आरम्भ हुवा उसी समय यवन राजा (ग्रीकराजा) दिमित्र (डेमेट्रिय) ने अपनी विशाल सेना के साथ हमारे भारतवर्ष के मध्यदेश पर आक्रमण कर दिया। इस राष्ट्र की विपत्ति को देखकर खारवेल ने अपने देश के विरोधी राजा पुष्यमित्र के साथ सन्धि करके दिमित्र के ऊपर आक्रमण किया। खारवेल के प्रबल प्रत्याघात से पलायित दिमित्र भागकर भारत से बाहर जाकर अपने देश को लौट गया। इस विजय लाभ को देखकर अत्यधिक प्रभावित भारतवर्ष के समस्त राजाओं ने खारवेल राजा को अग्रपूजा का स्थान दिया। शुङ्गसातवाहन को और उत्तरापथ के आक्रामक यवनों को पराजित करके खारवेल राजा ने पण्डितों का और जैनमुनियों का एक महासम्मेलन किया। इस महासम्मेलन में आए विद्वानों ने खारवेल महाराज को खेमराजा 'धर्मराजा' इन दो उपाधियों से विभूषित किया।

**यशोधर्माः** - पुराणों के अनुसार यशोधर्म नृपति का जन्म पांचवीं शताब्दी में पराशर गोत्रीय ब्राह्मण कुल में हुआ। इसके शिलालेख मन्दसौरमण्डल में इधर उधर मिलते हैं। इससे अनुमान किया जाता है कि इसकी राजधानी मन्दसौर नगरी थी। मन्दसौर नगर के विजय-स्तम्भ में जो शिलालेख है उससे ज्ञात होता है कि इस श्रीयशोधर्म नृपति का साम्राज्य ब्रह्मपुत्र से उत्कल प्रदेश पर स्थित महेन्द्रपर्वत तक और हिमालय से सिन्धुसागर पर्यन्त था। हूणवंशीय महाक्रूर मिहिरकुल नाम का आक्रामक इन श्रीयशोधर्मा द्वारा किए गए प्रत्याक्रमण से पराजित होकर स्वदेश लोट गया। इन श्री यशोधर्मा महाराज का नाम निर्देश विष्णुवर्धन, हर्षवर्धन, विक्रमादित्य इत्यादि नामों से भी पुरानी पुस्तकों में मिलता है।

**समुद्रगुप्तः** - भारतवर्ष के पुरातन इतिहास में गुप्तवंश का असाधारण महत्त्व था। श्रीगुप्तः, घटोत्कच, प्रथम चन्द्रगुप्त, समुद्रगुप्त, द्वितीय चन्द्रगुप्त, कुमारगुप्त, स्कन्दगुप्त इत्यादि बड़े 2 राजाओं का उदय इसी वंश में हुआ। प्रथम चन्द्रगुप्त की धर्मपत्नी कुमारदेवी थी। उसके गर्भ से श्रीसमुद्रगुप्त पैदा हुआ था। पाटलीपुत्र में राज्याभिषेक के पश्चात् इन श्रीसमुद्रगुप्त नृपति ने दिग्विजय का शुभारम्भ किया। प्रयाग के (इलाहाबाद के) स्तम्भ लेख के अनुसार श्रीसमुद्रगुप्त ने सम्पूर्ण भारत को स्वाधीन किया। शौर्य, धैर्य, विद्वत्ता और कलाभिज्ञता के उत्कृष्टगुणों से समुद्रगुप्त का व्यक्तिव लोकोत्तर माना जाता है। भारत के बाहर के देशों के नृपतियों के साथ भी इनका सम्बन्ध था। दिग्विजय करके समुद्रगुप्त ने चक्रवर्तित्व के निर्देशक अश्वमेध यज्ञ को किया। इन समुद्रगुप्त के शासनकाल में भारतवर्ष का ऐसा सर्वंकष समुत्कर्ष हुआ कि इस कालखण्ड को ऐतिहासिक विद्वान् 'स्वर्णयुग' कहते है।

**किशनपोलबाजारः, जयपुरम्**

कल्पनाकलिता कविताकथाः

# नगरवधूः कालिदासश्च

❑ डॉ. रामदत्त शर्मा, डी. लिट्

सिंहलद्वीपे महाराजः कुमारदासः राज्यम् अकरोत् कालिदासः तस्य परममित्रम् आसीत् किन्त्वेकदा स राज्यं त्यक्त्वा पलायितः। एकदा कुमारदासः एकां प्रतियोगिताम् अकरोत्, सः अचिन्तयत् यद् रुष्टो भूत्वा पलायितः कालिदासः प्रतियोगिताव्याजेन ज्ञातो भवेत्। एतदर्थम् अनुष्टुप्पद्यस्य एका पंक्तिः प्रतियोगितायै दत्ताऽभूत्।

कवितायाः या पंक्तिः आसीत् सा पंक्तिः एकस्याः वेश्यायाः हस्तगता अभवत्। संयोगवशात् कालिदासस्तां वेश्याममिलत्। सा वेश्या तां पक्तिं दिवानिशम् अस्मरत् कालिदासमप्याश्रावयत् रुदन्ती। कालिदासः तस्या वेश्यायाः दुःखं दृष्ट्वा श्लोकस्य अन्यां पक्तिम् अवदत्।

आसीत् प्रथमा पंक्तिः- **कमले कमलोत्पत्तिः श्रूयते न तु दृश्यते।** कालिदासः अस्या द्वितीयां पंक्तिम् अरचयत् **बाले! तव मुखाम्भोजे कथम् इन्दीवरद्वयम्?** अर्थात् कमले कमलोत्पत्तिः श्रूयते न तु दृश्यते। तव मुखाम्भोजे कथम् इन्दीवरद्वयम्? सा वेश्या तदानीम् क्षुरिकया तम् अहनत् इदं विचार्य यत् कालिदासस्येमं श्लोकं श्रुत्वा नृपः बहुधनं दास्यति। वेश्या तदा राजद्वारं गत्वा स्वयमिमं श्लोकपठत्। तदा राजद्वारे स्थिताः जनाः आश्चर्यचकिताः अभवन्। कुमारदासः अचिन्तयत् यत् कालिदासात् अतिरिक्त एवम् अद्भुतां कल्पनां न कोऽपि कर्तुं शक्नोति।

कुमारदासेन पद्यस्य विलक्षणोऽर्थो ज्ञातो यत् मुखकमले नेत्रकमलद्वयम् आस्ते अतः कमले कमलोत्पत्तिः संजाता, दृष्टा च।

इदं श्रुत्वा स वेश्यामपृच्छत्, केनेदं पद्यं रचितम्?

बहुपृष्टाऽपि वेश्या न अकथयत् यदियं पंक्तिः कुतः अमिलत्। परन्तु कुमारदासः ज्ञातुम् बहु प्रयत्नम् अकरोत्। तर्जिता ताडिता च नगरवधूः स्वीकारम् अकरोत् यत् एषा पंक्तिः कालिदासस्य एव रचना अस्ति। कालिदासो मयैव घातित इति सा स्वीचकार।

कुमारदासः निजमित्रस्य वधं श्रुत्वा हृदयविदारकं दुःखं, प्राप्य तस्य कृते इतस्ततः भ्रमणं कृत्वाऽन्ततः प्राणत्यागमकरोत् यतः कालिदासस्तस्मै नाऽमिलत्। सिंहलद्वीपे तेन कालिदासस्य चिताया उपरि स्मारकं निर्मितं, तन्निकट एव कुमारदासस्य स्मारकमस्ति।

102, पॉकेट 16, सेक्टर 24, रोहिणी, दिल्ली

# संस्कृतसमाचाराः



जयपुरस्थ नगर-प्रसादेऽवस्थिते (सिटी-पैलेस इत्यत्र स्थिते) प्रीतम चौक इत्याख्ये प्रांगणे समायोजिते ऐषमे (2017 इति वर्षे) सवाईजयपुरलंकरणसमारोहे बहुप्रतिष्ठितो राजा पजवानदेवपुस्कारः प्रोफेसर बनवारीलालगौडमहाशयाय राजमाता पद्मिनीदेवीमहोदयया सबहुमानं प्रदत्तः। चिकित्साक्षेत्रे प्रदीयमानोऽयं पुरस्कारःइदम्प्रथमतया आयुर्वेदक्षेत्रे कृतायै अमूल्यसेवायै श्रीगौडमहाशयाय समर्पितः। सश्रीफलदुकूलं सर्वतोभद्रप्रसादे सन्निहित-विशालगंगाजलपात्ररजतप्रतिकृतिपुरः सर एकत्रिंशत्सहस्र-रूप्यकात्मकं पुरस्कारं गृह्णन्तः श्रीगौडमहाशयाः चित्रमध्ये राजन्ते।

# मुरारिबापुसूत्राणि

❑ प्रस्तोता - डॉ. हर्षदेव माधवः

**पृथिव्यां सुखमपि।**

पृथिव्यां दुःखेन सह सुखम् अपि वर्तते। पञ्चसहस्र-वर्षेभ्यः पूर्वं तथागतेन कथितं यत्, ''दुःखमस्ति, दुःखस्य कारणम् अस्ति, दुःखस्य हेतुरस्ति, तथागतस्य वचनानि सन्ति।'' किन्तु इदमपि सत्यं वर्तते यद्-धरित्र्यां सुखमप्यस्ति, सुखस्य हेतुरप्यस्ति, सुखस्य कारण-मप्यस्ति। दशरथः संततिरहितः आसीत्, अतः दुःखित आसीत् तथा कुलगुरुणा वसिष्ठेन कथितं यत्, 'हे राजन् ! धैर्यधना हि साधवः। भवान् धैर्यं धारयत्विति। यः साधकः गुरुचरणरजोमयं सौभाग्यं लभते तस्य दुःखं नश्यति।'

**कथासु परमार्थबोधः, नेतिहासोऽन्वेष्टव्यः।**

पुराणकथासु कथाः वर्तन्ते। किंवदन्त्यः वर्तन्ते। अर्थवादः वर्तते। तत्र कामं, सत्यं न भवेत्, किन्तु अध्यात्मं भवेत्, बोधः भवेत्, अतः पौराणिकघटनासु इतिहासो न अन्वेष्टव्यः।

कल्पभेदेन पञ्चपरमार्थगाथा वर्तन्ते, शिबेः, दधीचेः, रन्तिदेवस्य, बलेश्च-मानवतां त्रातुं एताः कथाः सन्ति। गावो रक्षणीयाः, संस्कृतिः रक्षणीया, मानवता रक्षणीया। शिबेः कथा महाभारते वर्तते। अत्र जीवदया स्वीकर्तव्या। दधीचेः कथा समर्पणस्य कथा वर्तते। रन्तिदेवस्य कथा दानशीलतायाः करुणायाश्च कथा वर्तते। रन्तिदेवस्य कथा परेषां कृते सर्वस्वसमर्पणस्य कथा वर्तते। बलेः कथा उत्कृष्टदानशीलतायाः कथा वर्तते। पञ्चकथासु परेषां कृते अन्येषां कृते त्यागो वर्तते। अयमेव परमार्थः। शिबेः कथायां देहस्य शकलाः न कर्तव्याः, किन्तु अस्माभिः देहाभिमानस्य नाशः कर्तव्य इति बोधः स्वीकर्तव्यः। दधीचेः कथा दुरितस्य संहारार्थं त्यागस्य कथा वर्तते। हरिश्चन्द्रस्य कथायां सत्यस्य रक्षणं वर्तते। शरीरनाशस्य चिंता नास्ति। शरीरनाशेऽपि धर्मः समाराध्यः।

**मनोनाशे न बन्धो न मोक्षो वा।**

नानकः कथयति, 'एक ओमकार सतनाम' इति। गोस्वामिन कथयन्ति, '**सीयाराममय सब जग जानी**'। मीरा वदति, यत्-

**मेरे तो गिरधार गोपाल, दूसरो न कोई।।**

कृष्णः अर्थात् नृत्यं कुर्वद् अद्वैतम्। अद्वैतं निगडं नास्ति, न भवेत् वा। अद्वैतं नूपुरं भवेत्। मीरायाः पादयोः अद्वैतस्य निगडबन्धनं नास्ति। तस्याः पादयोः अद्वैतस्य नूपुरं वर्तते।

एकः संन्यासी माम् अपृच्छत्, 'को बन्धः?, को मोक्ष? इति।' अहं अकथयम् 'तात ! भवान् ब्रह्मविद्याम् अधीते।' अहं किं वदामि? वस्तुतः बन्धमोक्षयोः कारणं मन एवास्ति। यदा मनो गच्छति, मनो नश्यति तदा संसारोऽपि नश्यति। मनसः त्यागे न बन्धः, न मोक्षः। किन्तु भक्तिमार्ग उपदिशति यत्, 'भवान् मनः ईश्वरेण सह युनक्तु, तत् पश्चात् न बन्धः, न मोक्षो वा।'

**अस्तित्वान्न पलायनमुचितम्।**

ये महापुरुषाः बभूवुः, ते संसारं त्यक्त्वा जग्मुः। किन्तु, अस्तित्वात् पलायनं नोचितम्। भवन्तः बुद्धपुरुषाः भवेयुः। बोधस्य पश्चात् विशिष्टरूपं प्राप्नुयुः। बोधिसत्त्वं भवितुं यशोधरां त्यक्त्वा, राहुलं च त्यक्त्वा पलायनस्य नास्ति आवश्यकता। भवदस्तित्वं भवन्तं शप्स्यति, यदि भवान् पलायनं करिष्यति।

**सूक्ष्मं व्याख्यातुं स्थूलाश्रयः।**

सूक्ष्मं व्याख्यातुं स्थूलाश्रयः अनिवार्यः। अहं व्यासपीठाद् अवतरामि तदा उडयनं कृत्वा न गच्छामि। अहं सोपानपङ्क्तिम् आश्रयामि। तथैव ईश्वरं ज्ञातुं मूर्तिपूजा भवति। रामलक्ष्मणौ लङ्कायां रणाङ्गणे रथविरहितौ आस्ताम् तदा इन्द्रः धर्मरथं प्रेषयामास। धर्मरथः अर्थात् सत्यरथः धर्मरथः अर्थात् प्रेमरथः, करुणारथो वा। इत्थं स्थूलप्रतीकैः सूक्ष्मार्थाः प्रतिपादयितुं समर्थाः भवन्ति।

**भक्तेः मुक्तिरनुसारिणी।**

यः हरिं भजति, तस्य पृष्ठे मुक्तिर्धावति। ये वादविवादान् कुर्वन्ति, ते जीवनं व्यर्थं यापयन्ति। गोस्वामिनः कथयन्ति-

**राम भजत सोइ मुकुति गोसांई।**
**अनइच्छित आवइ बरिआईं।।**

यो मनुष्यः स्वसुखं न लभते तस्य मनः स्थिरं न भवति। निजसुखम् अर्थात् आत्मनि सुखम्। तुलसीदासः कथयति-

**निज सुख बिनु मन होई कि थीरा।**
**परस कि होई बिहीन समीरा।**

पवनाद् ऋते स्पर्शः न शक्यः। यत्र शून्यावकाशः तत्र स्पर्शोऽपि असम्भवः। अतो ये वैज्ञानिकाः अवकाशं गच्छन्ति ते तरन्ति। अत एव रामायणे स्वार्थस्य परमार्थः लिखितः।

**स्वारथ सोच जीव कहुँ एहा।**
**मन क्रम बचन राम पद नेहा।।**

यदा मनः ईश्वरचरणयोः स्थिरं भवति तदा मुक्तिः लभ्यते। स एव जीवनस्य परमस्वार्थः। मुक्तिः भक्तिमनुधावति।

**('खजुराहो' स्थाने रामकथा।) कामोऽपि देवः।**

खजुराहो स्थाने अस्माकं रामकथा-पारायणं वर्तते। कतिपयवर्षपूर्वं कोणार्के सूर्यमन्दिरे मया रामकथा कृता। अहं तत्रापि शिल्पदर्शनं कृतवान्। पुनरपि खजुराहो स्थाने काममीमांसां कर्तुम् अहं प्रयत्नं करोमि। रामचरितमानसम् आधारीकृत्य पूज्यपादैः तुलसीदासैः कामचर्चा कृता। यथा-

**काम कला कछु मुनिहि ब्यापी।**
**निज भयँ डेरउ मनोभव पापी।**
**सीम कि चाँपि सकइ कोइ तासू।**
**बड़ रखवार रमापति जासू।।**

तदैव मया मनसि निश्चितं यत्- कामम् अधिकृत्य पुनरपि कथागानं कर्तव्यम्। भगवान् शिवः तृतीयनेत्रेण कामं भस्मसात् चकार। पुनरपि शिवः तं मनोजं चकार। शिवेन मानसे प्रोक्तं यत्-

**जब जदुबंस कृष्ण अवतारा।**
**होइहि हरन महा महिभारा।**

शिवः कामदेवं भस्मीभूतं चकार, अत एव श्राद्धदिवसेषु इयं रामकथा कामदेवस्य श्राद्धरूपा। मया खजुराहो स्थाने कामशिल्पानां दर्शनं कृतम्, किन्तु मम मनसि न कापि विकृतिर्जाता। तत्र अश्लीलं वा बीभत्सं वा किञ्चिदपि नास्ति। सर्वेऽपि कृष्ण सूत्रमिदमशृण्वन्।

**बहिः कामदेवः अन्तर्महादेवः।** यदि भवन्तः स्मरिष्यन्ति सूत्रमिदं तदा न कदापि मनः विकृतं भविष्यति। मानसे गोस्वामिभिः कथितम्-

**तात तीनि अति प्रबल खल काम क्रोध अरु लोभ।**

यस्य मनसि महादेवो विराजते, तस्य अहितं कामो न करोति। यदि चित्तं शुद्धं स्यात्, तदा सर्वे विकारा विगलिताः भवन्ति। कामः, क्रोध, लोभश्च एते त्रयः खलाः। किन्तु न कोऽपि क्रोधदेव इति वदति। न लोभः अपि देवः इति कथयति। मम देशस्य ऋषीणां अन्तः करणस्य पवित्रवृत्या कामः देवपदे स्थापितः।

रामचरितमानसे कथितं यत् तेजस्विनं कदापि लघु वा क्षुद्रं वा न गणयेदिति।

**कामवृत्तिः अश्वइव।**

कामदेवस्य महान् प्रभावः। किन्तु भक्तेः समीपे तस्य प्रभावः लघुकः। यदि मनसि भजनं न भवेत्, भक्तिः न भवेत् तदा एकः स्फुल्लिङ्गः अपि दग्धुं शक्तः। रामचरितमानसे लिखितं यत्-

**भए कामवस जोगीस तापस पावँरन्हि की को कहै।**
**देखहिं चराचर नारिमय जे ब्रह्ममय देखत रहे।।**
**अबला बिलोकहिं पुरुषमय जगु पुरुष सब अबलामयं।**
**दुइ दंड भरि ब्रह्मांड भीतर कामकृत कौतुक अयं।।**

यदि मनः भजनेन भक्त्या लग्नं भवेत् तदा इन्द्रियाश्वाः नियन्त्रणे भवेयुः। कामवृत्तिः वेगवती अश्वा। 'माणकी' इति- अश्वायाः एका जातिः। यदि मनः जपमालायां लीनं तदा कामवृत्तिरूपा अश्विनी न हानिं करोति। भक्तिरेव कामवृत्तौ पतनात् त्रायते।

**कामः परोपकारी।**

देवैः शिवसमाधिभङ्गः कर्तुं कामः प्रेषितः। इन्द्रेण आदिष्टं यत्-शिवः समाधौ वर्तते तं विक्षिप्तं कुरु, इति। कामदेवोऽजानात्-यत् मम मृत्युः निश्चितः, किन्तु अहं परोपकारार्थं गमिष्यामीति। कामः परोपकारी वर्तते। देवानां हितार्थं स प्राणान् त्यजति। शृङ्गाररसः जीवने स्वीकार्यः। किन्तु शृङ्गाररसः मृगया रसो न भवेद् इति ध्यातव्यम्। अतः कामदर्शनम् अपि निर्दोषमनसा शुद्धमनसा उद्घाटितमनसा भवेत्।

**रामचरितमानसे सप्तदर्शनानि।**

रामचरितमानसे सप्तदर्शनानि सन्ति।

**(१) रामदर्शनं केन्द्रस्थाने वर्तते।**

रामात् सीता न पृथक् वर्तते। अतः वाल्मीकेः सीतादर्शनं भव्यं वर्तते। रामदर्शनेन सह सीतायाः, लक्ष्मणस्य, भरतस्य- एतानि सर्वाणि दर्शनानि सन्ति।

**( २ ) शिवदर्शनम्** - शिवदर्शनान्तर्गतं उमादर्शनं, हनुमद्दर्शनं च।

**( ३ ) धर्मदर्शनम्-** दशरथ-जनक-शीलनिधि-सत्यकेतु-चरितानि धर्मदर्शनं वर्तते। रामस्य मातृणां कथा: धर्मदर्शने वर्तन्ते।

**( ४ ) अर्थदर्शनम्-** लङ्का-अयोध्या-मिथिला-हिमालय-इत्यादीनां समृद्धि: अत्र वर्तते। अयोध्याया: समृद्धि: दैवी-लङ्काया: आसुरी। मिथिलाया: समृद्धि: नैसर्गिकी।

रामचरितमानसे लिखितम्-

**जो संपदा नीच गृह सोहा।**
**सौ बिलोकि सुरनायक मोहा।।**

इत्थं 'मानसे' समृद्धिवैपुल्यं वर्तते।

**( ५ ) कामदर्शनम्-** कामदर्शनमपि विपुलं वर्तते। शरीरेण चेतसा शुद्धिं प्राप्य मन्दिरे प्रवेश: कर्तव्य:, तथैव कामदर्शनस्य पश्चात् आत्मदर्शनं कर्तव्यम्।

**( ६ ) मोक्षदर्शनम्-** इदं दर्शनं भाग्यशालिन: कुर्वन्ति।

**( ७ ) विश्वदर्शनम्-** इत्थं सप्तदर्शनेषु चिंतनं वर्तते। रजनीश: कथयति स्म, 'सत्यं मनसि वर्तते, अत: अन्त: अन्वेषय।' 'रामदुलारी बापु' इत्याख्य: महापुरुष: अवदत्- '**सत्यं सर्वत्र वर्तते, यत्र कुत्रापि अन्वेषय।**' गोस्वामिन: कथयन्ति यत्-

**सीय राममय सब जग जानी**
**करउँ प्रनाम जोरि जुग पानी।।**

अत: विश्वदर्शनं सप्तमं दर्शनम्। परमात्मन: उदरे समस्तब्रह्माण्डं वर्तते।

**उदर माझ सुनु अंडज राया।**
**देखेउँ बहु ब्रह्मांड निकाया।।**

**कामो रसो रामो महारस:।**

यदा मया कोणार्के रामकथा कृता तदा श्रोतृवर्गाद् एकं निवेदनं आगतम्, यत् संस्कृतसाहित्ये बहूनि सूत्राणि वर्तन्ते। यथा- महर्षे: बादरायणस्य 'ब्रह्मसूत्रम्', नारदस्य 'भक्तिसूत्रम्', कपिलाचार्यस्य 'साङ्ख्यसूत्रम्', पतञ्जले: 'योगसूत्रम्', गौतमस्य 'न्यायसूत्रम्' इत्यादीनि सूत्राणि सन्ति। सारसर्वस्वं संक्षेपेण वक्तुं सूत्राणि सन्ति। वात्स्यायनस्य 'कामसूत्रम्' अद्भूतो ग्रन्थ:। तत्र वर्णनेषु अतिरेक:, किन्तु यदि समर्थ: गुरुर्भवेत् तदा न काचित् समस्या। रामचरितमानसे यत्-कामदर्शनं वर्तते तत् प्रायोगिकं वर्तते। तुलसीदासस्य कामदर्शनम् औषधं वर्तते। रामचरितमानसे लिखितं यत् काम: कृष्णस्य पुत्रोऽस्ति।

**कृष्ण तनय होइहि पति तोरा।**
**बचनु अन्यथा होइ न मोरा।।**

इत्थं काम: ईश्वरस्य पुत्र:। अस्माकं विज्ञानं कथयति यत्, पुत्रे पितु: सर्वलक्षणानि आगच्छन्ति- पितु: स्वर:, पितु: स्वभाव:, पितु: मुखाकार: एतत् सर्वम्। अत एतत् सिद्धं भवति यद् धर्माविरुद्ध: कामो ब्रह्मरूप:। धर्मो यस्मै 'आम्' कथयति अर्थात् यं स्वीकरोति स कामो ब्रह्म।' उपनिषद् कथयति यद् **अन्नं ब्रह्मेति व्यजानात्।** अत: वयं यत् खादाम: तद् ब्रह्म। किन्तु यदा अधिकं खादाम: तदा वमनं भवति। एवमेव कामातिरेकस्य वमनं भवति। काम: नास्ति खल:, कामी खल:। क्रोधो नास्ति असाधु:, क्रुद्ध: असाधु:। लोभो नास्ति पापं, लोभी पापं वर्तते। यदा काम: आतृप्ते: सेवित: तदा औषधग्रहणं अनिवार्यम्। तुलसीदासस्य औषधं किम्?

**जासु नाम भव भेषज हरन घोर त्रय सूल।**
**सो कृपाल मोहि तो पर सदा रहउ अनुकूल।।**

'हरिनाम' केवलम् औषधं वर्तते। हरिनाम्न औषधं त्रीन् सन्तापान् हरति, स भगवत्प्रियो भवति।

**श्रवणं भक्ति:**

'हरिनाम' जपे कोऽस्ति नियम: ? एकोऽस्ति नियम:। अथ किम्? कठोर: नियम:। यं ज्ञात्वा स्वयमेव कामं पराजितं करोति, स 'हरिनाम' जपात् धन्यतां प्राप्नोति। जेतुं हठाग्रहान् त्यजन्तु। 'दानिश्ता' अर्थात् स्वयमेव ज्ञात्वा पराजयम् अवगम्तव्यम्। अत्र गजलपङ्क्ति: वर्तते -

**इस खेल में एक दानिश्ता मुझसे हार गया,**
**यही एहसास मुझे जिन्दगीभर मार गया।**

कृष्णेन राधायै वंशी प्रदत्ता, किन्तु स्वकण्ठ: मीरायै प्रदत्त:। अत: कोऽपि कृष्णस्य कण्ठं श्रोतुं इच्छति चेत् तेन मीराया: भजनानि श्रोतव्यानि। (मीरा श्रोतव्या)।

कृष्ण: यदा धराधाम तत्याज तदा स सर्वमपि ददौ। अर्जुनाय भगवद्गीता, मोक्ष: कंसाय, मित्रपदं श्रीदाम्ने, प्रणय: व्रजाङ्गनाभ्य:, अश्रुबिन्दव: यशोदानन्दाभ्यां, ऋक्मिण्या: ऋते सर्वराज्ञीभ्य: द्वेष:- इत्थं कृष्णेन सर्वमपि दत्तम्।

**सत्सङ्गात् कामे रामोद्भव:।**

गोस्वामिभिः कामः खलो मतः। **'तात तीनि अति प्रबल खल काम क्रोध अरु लोभ।'**

कामक्रोधलोभाः त्रयः महाखलाः। इत्थं तुलसीदासेन कामाय गाली प्रदत्ता। किन्तु तेन एव उपायो दर्शितः। **खलउ करहिं भल पाइ सुसंगू।** अर्थात् सत्सङ्गात् खलः शनैः शनैः साधुः भवति। कामोऽपि शनैः शनैः रामो भवति। कामो रसः, रामो महारसः। परमात्मा रसमयो वर्तते। **'रसो वै सः'** इति प्रसिद्धेः।

**जीवावश्यकता कामः।**

ऋग्वेदे नासदीयसूक्ते कामस्य निर्देशः वर्तते। कामः प्रथमं जनिं लेभे। कामो मनसो रेतः आसीत्। कामः अर्थात् इच्छा। परं ब्रह्मणा कामः कृतः यत्- **'एकोऽहं न रमे, न रमते मे मनः'** अतः एकोऽहं बहु स्याम्। इति। परमात्मना इत्थं बहुभवितुं चिकीर्षा कृता, अतः सृष्टिप्रपञ्चो रचितः। अत एव कामेच्छा जीवस्य आवश्यकता, किन्तु इच्छातिरेकेन मनुष्यः कामी भवति। **'काम बात कफ लोभ अपारा।'** आयुर्वेदे महापुरुषैः कथितं यत्-वात-कफ-पित्तमयं मनुष्यशरीरं वर्तते। एते त्रयः दोषा अपि सन्ति। तेषां सम्यक् मात्रको मनुष्यः स्वस्थः निरामयो भवति, किन्तु एकस्यापि प्रकोपात् मनुष्य आतुरो भवति।

**इच्छास्तिस्त्रः।**

रामचिरतमानसे तिस्त्रः इच्छाः कथिताः। इच्छा त्रिधा वर्तन्ते-अधमा, मध्यमा, उत्तमाश्च-

**सुत बित लोक ईषना तीनी।**
**केहि कै मति इन्ह कृत न मलीनी।**

पुत्रेच्छाऽपि कामः तत्र कामः ईषत् चैतन्ययुक्तः। वित्तैषणाऽपि कामः। अयं कामो जडः। अयं मध्यमः कामः लोकैषणाऽपि कामः। प्रतिष्ठा अधमः। परमात्मना मानवदेहं दत्त्वा यूयं प्रतिष्ठिताः कृताः। कस्मात् लोकैषणा? भिक्षां न याचध्वम्। केचित् साधकाः अपि लोकैषणायां पतिताः भवन्ति। कामोऽपि इच्छा, किन्तु कामस्य प्रकोपो न भवेत्। यदा विकारः वृद्धिं गच्छेत् तदा व्याधिः भवति।

**विषयेच्छा प्रकृतिः, अतिरेको विकृतिः।**

परमात्मा समयपत्रकं रचयति। यः समयं संरक्ष्य विषयान् भुङ्क्ते सः प्रकृतिं जानाति। यः समयमर्यादां विस्मरति सः विकृतिं प्रति गच्छति। विषयाणाम् इच्छा प्रकृतिः, किन्तु कामानाम् उपयोगः विकृतिर्वर्तते। यदा मनुष्यः कालं, सम्बन्धान्, स्थानं, औचित्यमनौचित्यं विस्मरति तदा दोषो जायते। गोस्वामिनः कथयन्ति-

**पसु पच्छी नभ जल थलचारी।**
**भए कामबस समय बिसारी।।**
**सिद्ध बिरक्त महामुनि जोगी।**
**तेपि कामबस भए बियोगी।।**

अर्थात् कामातिरेकात् पशुपक्षिखेचर-भूचराः सर्वे कामवशाः जाताः। सिद्धा विरक्ता योगिनोऽपि कामप्रभावग्रस्ता जाताः।

**पतनाद् रक्षको हरिः।**

कामानाम् अतिरेकात् पतनं भवेत्, किन्तु कामवृत्तेः स्वात्मानं रक्षितुं केवलं प्रभुभक्तिः उपयोगिनी। यः भजनं करोति, भक्तिं करोति, तस्य कृते पतनकाले श्रीहरिः उपस्थितो भवति। समर्थजनाः अपि कामपीडिताः भवन्ति, किन्तु भक्तेषु कामो न प्रभावको भवति। अतः पतनात् स्वात्मानं रक्षितुं भक्तिः अनिवार्या। अत साधनं कदापि न त्याज्यम्। नामस्मरणम् 'नामचरितमानसम्' कथ्यते। प्रभूनाम्नो विशेषो महिमा। अतः कथितम्-

**बंदउँ नाम राम रघुबर को।**
**हेतु कृसानु भानु हिमकर को।।**
**विधि हरि हरमय बेद प्रान सो।**
**अगुन अनूपम गुन निधान सो।।**

परमात्मा गुणनिधानोऽस्ति। स एव संसारकर्ता।

**विदितोऽस्ति कामप्रभावः, न स्वभावः।**

कामसूत्रविषयकं बहुभिः आचार्यैः चिन्तनं कृतम्। यदा जगद्गुरुः शङ्कराचार्यः मण्डनमिश्रेण सह शास्त्रार्थमकरोत्, तदा कामविषयकाः, केचित् प्रश्ना आसन्। येषां प्रत्युत्तरं दातुं अनुभवं विना न शक्यमासीत्। अतः जगद्गुरुः परकायप्रवेशविद्यया काश्मीरस्य राज्ञः अमरुकस्य शरीरं प्राविशत्। स प्रश्नानाम् उत्तरं सम्प्राप्य पुनश्च स्वशरीरं प्राविशदिति कथ्यते, अस्मिन् देशे अनेके महापुरुषाः, धर्मपुरुषाः समुत्पन्नाः। किन्तु मनुष्यस्य कामावेगः न क्षीयते, किन्तु वर्धते। पाश्चात्यसभ्यताप्रेरित 'टी.वी. संस्कृतिः' सर्वमर्यादातटान् निमज्जयति। कामपूरेण आप्लावितं विश्वम्। अतः कथयामि यद् अस्माभिः कामस्य प्रभावो विदितः,

स्वभावो न विदित:। कामस्य स्वभाव: स्वात्मसमर्पणं, परहितार्थं, स्वात्मत्याग: वर्तते।

**कामसूत्रं ज्ञातुं चतुर्लक्षणानि।**

कामसूत्रं ज्ञातुं चतुर्लक्षणानि आवश्यकानि। मालक्यपुत: (मालक्यपुत्र:) बुद्धस्य शिष्य आसीत्। स स्वप्रश्नानां उत्तरं प्राप्तुं बुद्धस्य समीपे आगच्छत्। तेन बुद्धस्य व्यक्तित्वे चतुर्लक्षणानि दृष्टानि। कामसूत्रं ज्ञातुम् एतानि लक्षणानि आवश्यकानि।

(१) यस्य नेत्रे विशाले, निर्मले, वासनारहिते भवेतां स जागरूक: पुरुष:। बुद्धस्य नेत्रे विशाले आस्ताम् तस्य चिन्तने सङ्कीर्णता नासीत्। तस्य दर्शने करुणा आसीत्।

(२) य: चेतनाचेतनयो: पदार्थयो: संशयं न करोति स जागरूक पुरुष:। अहं कथयामि यत् यान् महापुरुषान् प्रति अस्माकं मनसि पूज्यभाव: भवेत्, तेषां छवय: चित्राणि वा पूजाकक्षे मा स्थापयन्तु। वन्दनीयपुरुषाणां प्रतिमां हृदये धारयन्तु। यत: निन्दां कर्तुम् अवसरो न स्यात्। अत: य: संशयरहितो भवेत् स: जागरूक: पुरुष:। भगवान् शिव: जागरूक: पुरुष:। यथा– '**जटा मुकुट सुरसरित लोचन नलिन बिसाल। नीलकण्ठ लावनविधि सोह बालबिधु भाल।।**' महादेवस्य नेत्राणि विशालानि, मस्तके सुरनदी। नीलकण्ठो लावण्यनिधिरस्ति।

(३) यस्य कण्ठस्वर: न वशीकरोति किन्तु अन्यान् मुक्तान् करोति स जागरूक: पुरुष:। य: जागरूक: स्वात्मज्ञानी भवति तस्य वाण्यां तस्य मनस: शुद्धताया: दर्शनं भवति। मुहम्मद-पैगम्बर-जिससक्राइस्ट-कबीरादीनां शब्द: मुक्तिवर्षां करोति। मन्त्राणां ध्वनय: स्वात्मानं वशीकुर्वन्ति।

(४) य: न दूरस्य किन्तु समीपस्थस्य वृत्तान्तं कथयति, य: प्रत्यक्षमिव सर्वं वदति तस्य कृते न किञ्चिद् दूरं भवति। मालुक्यपुत्र: मुमुक्षु: आसीत्। गौतमबुद्ध: अवदत्, 'मोक्षचिन्तां त्यज, यदि कोऽपि व्याध: मृगं हन्तुं आगच्छेत् किन्तु तस्य शर: तव शरीरे लग्न: भवेत् तदा त्वं किं करिष्यसि?' मालुक्यपुत्र: अवदत्, 'अहं शर: शरीरात् निष्कासयितुं कथयिष्यामि अपि च औषधलेपनं कर्तुं कथयिष्यामि।' इति। गौतमबुद्ध: अवदत्, 'अत एव मोक्षचिन्तां त्यज। अहं तव शरीरात् तव मनस: शरं निष्कासयितुं व्यवसायं करोमि।'

अत एव य: प्रत्यक्षवस्तुन: अनुभवस्य वा कथां करोति स एव जागरूक:। य: जागरूक: अर्थात् संयमी पुरुष: अस्ति, स एव कामसूत्रं ज्ञातुं प्रभवति। वात्स्यायने-नापि संयमस्य प्रशंसा कृता। अत: एतानि चतुर्लक्षणानि कामतत्त्वं ज्ञातुं आवश्यकानि।

**8, राजतिलक बंगलोज, आबादनगर,**
**बसस्टोप के पास, बोपल, अमदाबाद-380058**

**प्रेरकप्रसङ्गशतकम्** **षट्पञ्चाशत्तम: प्रसङ्ग:**

# वसन्ते तु काक: काक: पिक: पिक:

❑ **श्रीमती आराधना धर्माधिकारी**

एकस्तपस्वी वने उपविश्य तपस्यां कुर्वन्नासीत्। तस्य देशस्य राजा स्वमन्त्रिभि: सैनिकैश्च सह आखेटक्रीडा-मकरोत् तत्र ते सर्वे परस्परं वियुक्ता अभवन्। राज्ञ: सैनिका: राजानं राजा च तानन्वेष्टुमितस्ततोऽभ्रमन्। तदैव केचन सैनिका: साधो: समीपे सम्प्राप्ता:। ते अवदन् किं रे भिक्षुक अपि त्वया अस्माकं राजा मंत्री वावलोकित:? साधुस्तथैव नेत्रे निमिल्योपविष्टो न किंचिदप्यवदत्। ततो राज्ञो मंत्री समायात: महाराज किं मे राजा सैनिका वा इत आगता:। अथापि साधुश्चक्षुषी निमिल्य तूष्णीमेवासीन्न किमप्यवदत्। अन्ते राजा समागत:।

राजा अवदत्-मुनिवर! क्षम्यतां मेऽपराध: परमहं महति कष्टे पतितोऽस्मि, किं मे मंत्री सैनिका वा अत्र समागता:। अधुना चक्षुषी निमील्यैव साधुना कथितम् आम् राजन्। समागता:। पूर्वं सैनिका: पश्चात् मंत्री, अधुना च त्वं राजा समागत:। राजा अवदत्परं भवता तु नेत्रे निमीलिते क: किमस्तीति कथं ज्ञातम्। साधुरवदत्-राजन्। मनुष्य: व्यवहारेण भाषणेन च परिचीयते क: किंस्तरीय:? इति तेषां तव च वचनेनैव मया ज्ञातम्। क: किमस्तीति।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

# आख्यान-परिचयः

❑ सुमन शर्मा

'आङ् उपसर्गपूर्वकात्' ख्या प्रकथने इत्यस्मात् धातोः ''ल्युट् च'' (पा. सू. 3.3.15) इति सूत्रेण भावे 'ल्यूट्' प्रत्यये सति 'आख्यानम्' इति रूपं सिद्ध्यति। तारानाथकृतस्य ''वाचस्पत्यम्'' इति नामककोशस्य प्रथमभागे अस्य व्युत्पत्तिः ''आख्यायते अनेनेति आख्यानम्'' इति प्रदर्शिता। आख्यानशब्द आरम्भत एव कथाऽर्थे प्रसिद्धः। आख्यानानां सत्तायाः प्रमाणं ऋग्वेदसंहितायामपि प्राप्यते। साहित्यपर्दणे विश्वनाथेन ''आख्यानं पूर्ववृत्तोक्तिः'' इत्युक्तम्। डॉ. एस. के. दे. महोदयानुसारं ऋग्वेदे कथात्मकसूक्तं वस्तुतः पौराणिकमाख्यानमेव। यास्कः निरुक्ते (11.15) सरमा-पणिकथामाख्यानमेवोक्तवान्। ऋग्वेदाद् भिन्नवैदिकग्रन्थेष्व-प्याख्यानानां विवरणं प्रदत्तमस्ति। एतेषु कानिचन तु नूतनान्याख्यानानि सन्ति। परं कानिचन ऋग्वेदे संकेतिताख्यानानामेव परिबृंहितरूपमस्ति। ऋग्वेदेन सम्बद्धानुक्रमणिसाहित्ये विशेषतः बृहद्देवतासर्वानुक्रमणी निरुक्त-नीतिमञ्जरी-सायणभाष्ये च आख्यानानां घटनानाञ्च वर्णनमस्ति। पुराणेष्वप्याख्यानानां वर्णनं प्राप्यते, परमत्र अस्य घटनासु कुत्रचित् ह्रासो कुत्रचित् परिबृंहणं दृश्यते। महाभारतस्य आदिपर्वणि अनेन श्लोकेनापि एतत् संकेतितम्-

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।**
**बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति।।**

ब्राह्मणग्रन्थाः श्रौतसूत्राणि च एतेषां विकासस्य अध्ययनायावश्यकसामग्रीं श्रौतसूत्राणि च एतेषां सामान्यार्थाः कथा उक्तिर्वा स्वीक्रियते। अस्य व्यापकार्थस्य परिधौ कथा-कथानक-वृत्तान्त-आख्यायिका च समायान्ति। परम् आख्यानस्य विशेषरूपेण प्रयोगः ऐतिहासिककथानकस्य वृत्तान्तस्य वाऽर्थे भवति। आख्यानस्य समानार्थकशब्दः ''गाथा'' इति प्रचलितो वर्तते। महाभारते 'आख्यान-उपाख्यान-कथा-पुराणेतिहासस्य' च प्रयोगः एस्मिन्नेवार्थे प्राप्यते।' गाथातः ''आख्यानानां विकासः'' इत्यधिक-सम्भावना जायते। प्रारम्भे आख्यानानां मौखिकरूपेण गानं श्रवणञ्च भवतिस्म, पश्चात् लेखनमारब्धम्। अधुना 'गाथा' देवतानां महापुरुषाणाञ्च स्तुतेः एवञ्चाख्यानं पुरावृत्तकथायाः द्योतकमस्ति।

भारतीयसाहित्यशास्त्रे प्रगीतकाव्यं एवञ्चाख्यान-काव्यं मुक्तककाव्यस्य भेदरूपेण स्वीकृतमस्ति, परं पाश्चात्यसाहित्ये एते काव्ये ''कोरस'' ''बैलेड'' एवञ्च 'लिरिक' इत्यादिषु अन्तर्भवतः। मनुष्यः सभ्यतायाः आरम्भत एव स्वकीय-हर्षविषादं, सामूहिकगीत-नृत्य-काव्यसाहाय्येन व्यक्तं करोति स्म। सभ्यतायाः विकासेन सह नृत्यंगीतं काव्यञ्च सर्वं पृथक्-पृथक् जातम्। इदं गीतं शुद्धगीतरूपेण नासीत् अपितु अस्मिन् कथात्मकता आसीत्। एषा कथैव अग्रेसरन्ती प्रबन्धं पुराणमित्यादि-रूपेण विस्तृता जाता।

आख्यानानां शिक्षा मानवसमाजस्य सामूहिक-कल्याणस्य विश्वमङ्गलस्य चाऽभिवृद्धेः निमित्तमस्ति। भारतीयसंस्कृतेरनुसारं मानवः देवश्च उभौ परस्परं सम्बद्धौ स्तः। मनुष्यः यज्ञेषु देवेभ्यः हविः प्रददाति, तेन प्रसन्नाः भूत्वा तस्य अभिलाषं पूरयन्ति देवाः, एवञ्च स्वकीयप्रसादस्य वृष्टिं तस्योपरि कुर्वन्ति। इन्द्रश्विन-विषयके आख्यानेऽस्य विशदं दृष्टान्तमस्ति। आख्यानेषु आदर्शपारिवारिकजीवनस्यापि दृश्यं प्राप्यते। यथा-राजा, प्रजाः मुनिजनान् समादरन्ति स्म राज्ञः आदेशः सर्वोपरि आसीत्। राजा प्रजायां रक्षणं करोति स्म। अपराधिषु दण्डविधानादिकार्याणां सम्पादनं करोतिस्म। तथा च यज्ञ-रक्षाकार्यरतः सन् वसति स्म।

इत्थं एतेषा-माख्यानानां माध्यमेन नैकाः शिक्षाः प्रदातुं सफलप्रयासः विहितो वर्तते। एतेषां माध्यमेन अस्माभिः सहयोगः विवाहः अतिथिसत्कारः गुरुजना-नामादरः मैत्री-कर्तव्यपरायणता परिश्रमः स्नेहः पातिव्रत्यं गुरुश्रेष्ठता चेत्यादिनां शिक्षा प्राप्यते।

**सन्दर्भग्रन्थसूची :-**

(क) वाचस्पत्यम् (तारानाथकृतम्) (ख) साहित्यपर्दणः (विश्वनाथकृत) (ग) निरुक्तम् (यास्ककृतम्) (घ) अनुक्रमणी-साहित्यम् (ङ) आदिपर्व, महाभारतम् (च) संस्कृतसाहित्यस्येतिहासः (डॉ. उमाशङ्करशर्मा 'ऋषि') (छ) पद्मपुराणम्

**शोधच्छात्रा,**
**राजस्थानविश्वविद्यालयः, जयपुरम् ( राज. )**

# सिद्धान्तकौमुद्याः सामाजिकव्यवस्थायाः अध्ययनम्

❑ जगराम मीणा

संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा विद्यते। देववाग्, देववाणी, देवभाषा गीर्वाणवाणी इत्यादिभिः नामभिः बोध्यते। वेदाविर्भावानन्तरमियं भाषा वैदिक-भाषारूपेण प्रचलिता आसीत् ऋषिभिर्देवैर्वा सरलीकृता संस्कृता च संस्कृतसंज्ञां प्राप्तवती। भाषेयं विश्वभाषाणां जननी इति विदुषां मतम्। भारतीयविदुषां मते वैवस्वतमन्वन्तरे मनुष्योत्पत्यनन्तरमेव भगवता परमेश्वरेण आदिमनुष्याणां चेतस्सु वेदज्ञानं प्रकाशितम्। सा प्राचीना भाषा वेदभाषा आसीत्। संस्कृतभाषाया उत्पत्तिकालविषये विद्वत्सु नास्ति मतैक्यम् तथापि भारतीयविदुषां कथनं यत् भाषेयं नित्या अनादिनिधना परमेश्वराज्जाता अस्ति। संस्कृतभाषा द्विविधा प्रोक्ता दैवीवाग् लौकिकभाषा च। दैवीवागेव वैदिकभाषानाम्ना सम्बोध्यते। लौकिकभाषाया उत्पत्तिः वेदाधारेणैव जाता। व्याकरणशास्त्रस्यापि मूलं वेद एव। ऋग्वेदे केचिन्मन्त्राः दृश्यन्ते यत्र व्याकरणस्य प्रवृत्ति-विषयको दृश्यते सिद्धान्तः। तत्रोक्तं व्याकरणरूपदेवस्य चत्वारि शृङ्गाः सन्ति। द्वे शीर्षे स्तः, अस्य सप्त हस्ताः विद्यन्ते। अयं गर्जति। अयं त्रिधा बद्धो विद्यते। एवंभूतो देवो मनुष्येषु प्राविशत् अर्थात् यो व्याकरणं जानाति स एव परमात्मानं ज्ञातुं शक्नोति। शब्दतत्वं व्याकरणेनैव ज्ञातुं शक्यते।

व्याकरणशब्दो यस्माद्धातोर्निष्पद्यते तस्य मूलेऽर्थे प्रयोगो यजुर्वेदेऽवलोक्यते यथा प्रजापतिः सत्यानृते रूपे व्याकरोत्। व्याकरणशास्त्रस्योद्भवः कदा सञ्जात इति विषये निश्चितरूपेण किञ्चित् कथनन्तु कठिनम् परन्तु प्राप्तवैदिकपदपाठानां रचनाकालात् प्रागेव संस्कृत-व्याकरणस्य पूर्णत्वं सञ्जातमासीदिति तु प्रायेण निश्चितमेव। गोपथब्राह्मणेऽपि प्रकृतिप्रत्ययादीनां निर्देशो दृष्टः। महाभारतेऽपि व्याकरणशब्दस्य निष्पत्तिविषये प्रोक्तम्। सर्वार्थानां व्याकरणाद् 'वैयाकरण' उच्यते स व्याकरणं व्याकरोति।

संस्कृतव्याकरणग्रन्थेषु अष्टाध्याय्याः महत्वपूर्णं स्थानं विद्यते। ऐन्द्रचान्द्रकाशकृत्स्नापिशलादि प्रामुख्यम्भजमानेषु व्याकरणेषु रत्नायमानं साङ्गोपाङ्गं पाणिनीयमेव व्याकरणं समुपलभ्यते। अनुपमरत्नस्वरूपमिदं व्याकरणम् विद्यते। एतादृग् व्याकरणमन्यत्र न विद्यते। अष्टाध्यायी गीर्वाणवाण्याः प्राचीनेष्ववार्चीनेषु च वाङ्मयेषु सूर्य इव प्रकाशमाना विराजते। अष्टाध्याय्याः व्याख्यारूपाः सिद्धान्तकौमुद्यादिग्रन्थाः विद्यन्ते। कालक्रमेणैव संस्कृतं हि जनभाषातः शिष्टभाषात्वे परिणतं तु प्रथममेवासीदेव पुनश्च शिष्टभाषातोऽपि पण्डितभाषायां परिणतं सत् शिष्टव्यवहारतो अपि दूरङ्गतम्।

सिद्धान्तकौमुद्यां हि एतादृशाः प्रयोगाः दृश्यन्ते येषां सम्यक्तया अध्ययनेन तदानीन्तना या सामाजिकी व्यवस्था आसीत् तस्या ज्ञानं भवति। तदानीं भारतवर्षस्य कीदृशी व्यवस्था तथा सामाजिकं चिन्तनं कीदृग् आसीत्।

१. ऋषिवाचक शब्दाः - आत्रेय, वाशिष्ठाः, दाक्षायणः, मैत्रेयः, उपकाः, लमकाः, अगस्त्यः २. क्रीडावाचक-शब्दाः- मल्लयुद्धम्, दाण्डा, मौष्टाः, उद्यानक्रीडा। ३. सम्बन्धवाचकशब्दाः- पितरौ, पुत्रौ, भ्रातरौ, मातुलः, मातुलानी पितामहः, मातामही, सपत्नी, जाया, जामाता। ४. कृषिवाचकशब्दाः - हलीषा, लाङ्गलीषा, गवेन्द्रः, खनति, खलपूः। ५. नगरग्रामवाचकशब्दाः- मागधः, कालिङ्गः, कौरव्यः, ग्रामता। ६. खाद्यान्नवाचकाः- दाधिकम्, लवणः, सूपः, शाकम् यवाः, गोधूमाः, माषाः, तिलाः, गुडधाना। ७. रोगवाचकाः प्रयोगाः- वातिकम् पैत्तिकम्, ज्वराः। ८. पशुपक्षिवाचकाः प्रयोगाः - सिंहः, हंसः, अश्वः, मृगः, काकम्, बकः, औक्षकम्, धैनुकम्, आश्वम्। ९. नदीवाचकाः प्रयोगाः - गङ्गा, गण्डकः, गोमती, विपाशा, चन्द्रभागा, इरावती, सरस्वती, यमुना कृष्णा इत्यादि।

**शोधच्छात्र, ज.रा.रा.सं.वि.वि., जयपुर**

# सूत्रसाहित्यस्य आश्वलायनगृह्यसूत्रे एका समालोचनात्मकदृष्टिः

❑ कैलाशचन्द्रबुनकरः

यत्र विषयो व्यवस्थितरूपेण संक्षिप्तशैल्यां प्रस्तूयते तत् सूत्रसाहित्यमित्युच्यते। संक्षिप्तता, स्पष्टता, बोधगम्यता चास्य प्रमुख्यवैशिष्ट्यानि सन्ति। भारतीय-वाङ्मये सूत्रसाहित्यस्य महत्वपूर्णं स्थानमस्ति। सूत्रपद्धत्या साहित्यमिदं सरलतया कण्ठस्थीकर्तुं शक्यते। वैदिकसाहित्ये सूत्राणां कालः अध्ययनस्य चिन्तनस्य च एकस्याः परम्परायाः प्रतिनिधिः अस्ति। सूत्रसाहित्यम् एका तादृशी शृंखला वर्तते या वैदिकसाहित्यं परवर्तिसंस्कृतसाहित्येन संयोजयति। एतस्मिन्नेव सम्पूर्णमपि वेदाङ्गसाहित्यम् अन्तर्भवति। सूत्रसाहित्यस्य विस्तृतरूपरेखायाः दर्शनं विवरणञ्च वेदाङ्गग्रन्थेषु भवति।

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।**
**ज्योतिषामयनं चक्षुर्वेदाङ्गानि षडेव तु।।**

संहिताकालानन्तरं ब्राह्मण-आरण्यक-उपनिषदां काल आगच्छति। सूत्रसाहित्यस्य दर्शनं ब्राह्मणकालादेव भवति। ऐतिहासिकपरम्परायाः अयं सिद्धान्तः स्मृतिपटले अंकितो भवेदिति आवश्यकमस्ति। यतोहि साहित्ये युगानां विभाजनम् अध्ययनस्य सौविध्यार्थं सरलतायै च भवति। युगान्तका-रिपरिवर्तने अतीतस्य नैकानि चलचित्राणि चित्रितानि भवन्ति।

वस्तुतः ब्राह्मणेषु आरण्यकग्रन्थेषु च वर्णितानां यज्ञ-यज्ञाङ्गानां प्रसङ्गे सूत्रशैल्याः दर्शनं भवति। परन्तु अस्य विकसितरूपं वेदाङ्गग्रन्थेषु मिलति। सूत्रकालस्य गणना वैदिकसाहित्यस्य तृतीयायाम् अन्तिमावस्थायाञ्च क्रियते। सूत्रसाहित्यस्य उद्गमः भाषायाः संक्षिप्तता, स्पष्टता एवं बोधगम्यतायाः कृते अभवत्।

मैकडोनलोऽपि स्वसंस्कृतसाहित्यस्य इतिहासे सूत्रसाहित्यस्योल्लेखं कृतवान्। एतादृशस्य साहित्यस्य उत्थानं ब्राह्मणग्रन्थेषु सुरक्षितासु लोकपरम्परासु स्पन्दमानानां धार्मिकसंस्काराणां रीतीनां च विस्तारस्य प्रसारस्य च संक्षिप्ततायै अभूत्। अस्य साहित्यस्य उद्देश्यं केवलं धार्मिककर्मणां रीतिनीत्याः व्यवस्था न, अपितु सम्पूर्णक्रियाकलापानां स्पष्टतया विध्यात्मक-गणनया सह च वैज्ञानिकानाम् ऐतिहासिक-विषयाणां च प्रतिपादनमपि अवर्तत। एतादृश्या प्रणाल्या वेदार्थावगमनाय एका सूक्ष्मा वैज्ञानिकी च प्रक्रिया प्रकाशमागता। एतादृशवैशिष्ट्यानां कारणतः अस्य साहित्यस्य या परम्परा प्रचलिता सा अक्षुण्णरूपेण अग्रे वर्द्धमाना अवर्तत, अतएवास्यामेव शैल्यां प्रायः सर्वेषामेव ग्रन्थानां निर्माण-मारब्धम्। एषा पद्धतिः वेदानाम् अक्षुण्णपरम्परायाः संरक्षणे एकं महत्त्वपूर्णं योजकमस्ति। वेदस्यैव भागभूताः तदुपकारका वा सहायकग्रन्था वा वेदाङ्गानि सन्ति। वेदाङ्गसाहित्यं वस्तुतः वेदार्थज्ञानार्थं सहायकं वर्तते। मैकडोनलमतानुसारं भारतीयदृष्ट्या च सूत्रशैल्यां निबद्धं वैदिकसाहित्यं षड् भागेषु विभक्तं यच्च वेदाङ्गमिति कथ्यते।

**छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।।**

**अपरञ्च-शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**

गृह्यसूत्रस्य अध्ययनेन ज्ञायते यत् विषयाणां क्रमः एकशृङ्खलाबद्धो नास्ति। येन विषयावबोधनं कतिपय-स्थलेषु दुरूहं जायते।

**यथा** - विवाहसंस्कारानन्तरं क्रियमाणस्य अग्न्याधानस्य उल्लेखः अस्मात् संस्कारात् पूर्वमेव करणात् जनमनसि सन्देहः समुत्पद्यते यत् विवाहसंस्कारः पूर्वं क्रियते अग्न्याधानं वा। एतादृशी असम्बद्धता ऋग्वेदस्य त्रिष्वेव गृह्यसूत्रेषु दृष्टिगोचरीभवति। आश्वलायन-गृह्यसूत्रविषये कानिचित् उदाहरणानि प्रस्तूयन्ते।

१. विवाहस्य प्रसङ्गे मधुपर्कस्य वर्णनं न कृत्वा ऋत्विज् वरणानन्तरम् अस्य उल्लेखो विहितः। एतस्य विवेचनं विवाहसंस्कारप्रसङ्गे एव करणीयआसीत् यतोहि कन्यायाः द्वारे वरस्य आगमनसमये मधुपर्कप्रदानं क्रियते।

२. अग्निप्रदक्षिणानन्तरं लाजाहोमः ततश्च अश्मारोहणं भवति। अस्मिन् गृह्यसूत्रे अग्निप्रदक्षिणानन्तरम् अश्मारोहणं तदनु च लाजाहोमस्य वर्णनं कृतं विद्यते।

३. लाजाहोमानन्तरं वध्वाः शिखाविमोचनस्य उल्लेखोऽस्ति। अस्य वर्णनं सप्तपद्यनन्तरम् अथवा अस्य संस्कारस्यारम्भे एव करणीयम्। यतोहि लाजाहोम-अश्मारोहणानन्तरमेव सप्तपदीनामकं कर्म क्रियते।

४. अस्मिन् गृह्यसूत्रे विवाहसंस्कारानन्तरं होमस्य, पार्वण-स्थालीपाकस्य चैत्ययज्ञस्य चोल्लेखोऽस्ति। विवाहानन्तरं गर्भाधानसंस्कारस्य विवेचनं युक्तिसङ्गतं प्रतीयते। यतोहि अयं मानवसृष्टेरादिसंस्कारोऽस्ति। विवाहस्य मुख्योद्देश्येषु च प्रमुखोऽस्ति गर्भाधान-संस्कारः।

५. उपनयनसंस्कारानन्तरम् उपाकरण-स्वाध्यायविधि-महानाम्नी प्रभृति व्रतानाम् उल्लेखः तर्कसङ्गतः प्रतीयते। यतोहि अस्य सम्बन्धो विद्याभिः सह भवति। आश्वलायनगृह्यसूत्रे तृतीयाध्यायस्य पञ्चमखण्डे उपाकरणस्य द्वितीयखण्डे च स्वाध्यायविधेः समुल्लेखो विद्यते। यद्यपि उपनयनसंस्कारस्य प्रथमाध्यायस्य एकोनविंशतिखण्डतः द्वाविंशतिखण्डं यावत् वर्णनमस्ति। महानाम्नी-प्रभृतिव्रतानां विषये तु गृह्यसूत्रस्यान्ते परिशिष्टं योजितं विद्यते।

६. समावर्तनसंस्कारस्य विवेचनं स्वाध्यायानन्तरमेव समीचीनं प्रतिभाति यतोहि वेदाध्ययनान्तरं समावर्तनसंस्कारः क्रियते। अस्मिन् गृह्यसूत्रे अस्य संस्कारस्य वर्णनं तृतीयाध्यायस्य अष्टमखण्डे सन्ध्या-कर्मणोऽनन्तरं कृतम्।

७. वैश्वदेवहोमस्य, पाकयज्ञस्य, पञ्चमहायज्ञानां च उल्लेखः शालाकर्मणोऽनन्तरमेव करणीयः। यतोहि एतानि गृह्यसूत्रस्य नित्यकर्माणि सन्ति। यानि प्रतिदिनं गृह एव सम्पाद्यन्ते। शालाकर्मणः विधानं आश्वलायनगृह्यसूत्रे द्वितीयाध्यायस्य सप्तमखण्डतः दशमखण्डं यावत् कृतमस्ति। यद्यपि वैश्वदेवहोमस्य वर्णनं प्रथमाध्यायस्य द्वितीयखण्डे, पाकयज्ञस्य प्रथमखण्डे, पञ्चमहायज्ञानां च तृतीयाध्यायस्य प्रथमखण्डे कृतमस्ति।

अतः आश्वलायनगृह्यसूत्रम् ऋग्वेदस्य आश्वलायनशाखया सम्बन्धितम् अस्ति। इदं चतुर्षु अध्यायेषु विभक्तमस्ति। अध्यायानां विभाजनं कण्डिकासु कृतं विद्यते।

१. प्रथमाध्याये चतुर्विंशति, द्वितीयाध्याये दश, तृतीयाध्याये द्वादश चतुर्थाध्याये च नवकण्डिकाः सन्ति। प्रथमाध्याये गृह्याग्निना सम्बन्धितानि वैश्वदेवादिकर्माणि तथा विवाहमारभ्योपनयनपर्यन्तं सर्वेषां संस्काराणां वर्णनम् अस्ति।

२. द्वितीयेऽध्याये श्रवणा-आश्वयुजीप्रभृतिकर्मणाम् अष्टका-अन्वष्टकाश्राद्धानां तथा गृहनिर्माणविधेश्च विवेचनं प्राप्यते।

३. तृतीयाध्याये पञ्चमहायज्ञ-स्वाध्यायविधि-तर्पण-उपाकरणादि-कतिपयप्रायश्चित्तकर्मणां तथा समावर्तन-संस्काराणां च विधानमस्ति।

४. चतुर्थाध्याये अन्त्येष्टिसंस्कारस्य पार्वणादिश्राद्धस्य शूलगवकर्मणश्च उल्लेखो मिलति। आश्वलायनगृह्यसूत्र-स्यैकं संस्करणं हरदत्तस्य व्याख्यया सह अनन्तशयन-ग्रन्थमालातः तथा द्वितीयं संस्करणं नारायणवृत्तिना सहितम् आनन्दाश्रममुद्रणालयात् पूनातः तृतीयसंस्करणं नारायणवृत्तिना सह प्रकाशितमस्ति।

इति आश्वलायनगृह्यसूत्रे एका आलोचनात्मिका दृष्टिः।

**शोधार्थी**
**वेदविभागे, ज.रा.रा.सं.वि., मदाऊ, जयपुरम्**

# जातेति कन्या

**❑ डॉ. साधना कंसल**

जातेति कन्या महतीयं चिन्ता तस्यै वरक्रयणं सरलं नास्ति।
नैकाः उपाधयः तया अधिगताः तासां तु किमपि मूल्यं नास्ति।
सा तु स्व-रूपेण सर्वत्र विश्रुता परन्तु रूपे प्रभावं नास्ति।
सर्वाः कलाः तस्यां प्रतिष्ठताः अद्य गुणानान्तु पूजा नास्ति।
यौतुकदानस्य हि रूढ़ि परिचिता नारीजीवनस्य तु विडम्बनास्ति।
उच्चे पदे सा सुस्थापिता पदस्य तु तस्याः गरिमा नास्ति।
लक्ष्मीः तया बहुलतया अर्जिता परं तदन्तिके किमपि नास्ति।
किं कार्यं, यत् करिष्यति कः, इयमेवास्माकं विचारणास्ति।
यावन्नार्यः न सुष्ठु प्रतिष्ठिताः देशोभतेः तु आशा नास्ति।

**व्याख्याता, संस्कृत,**
**राजकीय कला महाविद्यालय, कोटा (राज.)**

समस्त देशवासियों को दीपावली की हार्दिक शुभकामनाऐं





# दामोदरदास मोदी

**(विश्व हिन्दु परिषद्)**

**राजस्थान**

**डी-32, अहिंसा सर्किल, सी-स्कीम, जयपुर**

हार्दिक शुभकामनाओं सहित :-

निर्माता

ए इन्फ्रास्ट्रक्चर लिमिटेड

ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

छत एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

हमारी विशेषताएं

(English) Weekly
Organiser



- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क

भारत में ₹ 700/- (साधारण डाक द्वारा) • ₹ 820/- (स्थानीय वितरक द्वारा)

विदेशों में $ 60 (हवाई डाक द्वारा)

भारत प्रकाशन (दिल्ली) लि.
2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

समस्त देशवासियों को दीपावली की हार्दिक शुभकामनाएं :-

सुरेन्द्र पारीक
(विधायक भाजपा)
हवामहल क्षेत्र जयपुर



नरेश सौंकिया (ज्वैलर्स)

नवरत्नों के विक्रेता
पन्ना रत्न के थोक विक्रेता

घाटीवाला हाउस, परतानियों का रास्ता
चौड़ा रास्ता, जयपुर
मो.: 0141-2571026, मो.: 9829057106

नारी-स्तम्भः

# विवाहोऽस्तु शुभावहः

❑ डॉ. राजेश्वरी भट्ट

कार्तिकशुक्ल एकादशीतिथ्याना सहैव अस्माकं देशे चतुर्मासेभ्योऽवरुद्धानां शुभविवाहमहोत्सवानां क्रमः प्रारभ्यते। गृहे-गृहे वरपक्षीयाः कन्यापक्षीयाश्च पितरौ आत्मनः पुत्रपुत्र्योः विवाहे उत्तमव्यवस्थायै तत्परा दृश्यन्ते। निमन्त्रणपत्राणां रमणीयतायै अपूर्वतायै च तेषां प्रकाशनस्य कृते बृहद्धनराशिमपि न गणयन्ति। पक्षपूर्वं मया रत्नजटितं निमन्त्रणपत्रं प्राप्तं येन केवलं प्रेषकस्य वैभवप्रदर्शन-मात्रं प्रतीयते स्म। कुत्रचित् वरयात्रा-प्रस्थानसमये वाद्ययन्त्रदीपशिखावलि विस्फोटक-पदार्थहस्त्यश्वादीनां प्रबन्धने भूयसो धनस्यापव्ययः समाजे प्रतिस्पर्द्धां जनयति। क्वचिद् वरयात्रायां अनर्गलरूपेण नृत्यं कुर्वन्तः केचिद् उच्छृङ्खलयुवकाः विवाहस्य शुभमुहूर्तमपि अतिक्रमन्ते। फलतः वरयात्रायाः स्वागताय समुत्सुका जना विलम्बकारणेन वरयात्राया आगमनात्पूर्वमेव भोजनं कृत्वा प्रतिनिवर्तन्ते। विवाहावसरे नगरे यत्र तत्र विरचिताः सुसज्जिता राजप्रसादकल्पा विवाहमण्डपा मध्यमवर्गीयान् भ्रमयन्ति। कानिचिद् दिनानि पूर्वमहं क्षीणवित्तायाः कस्याश्चिच्छिष्याया विवाहसमारोहेऽगच्छम्। तत्र विहितां भव्यां व्यवस्थां दृष्ट्वा भ्रान्ताऽहं कदाचिद् अहं कस्मिन् अन्ये समारोहस्थले तु नागता इति विचार्य अग्रे गन्तुमुद्यताऽऽसम् किन्तु तत्र द्वारे स्थितान् परिचितान् जनान् दृष्ट्वाऽहं विवाहमण्डपं प्राविशम् तत्र कन्यायाः पितुः समक्षमागतं महत् कष्टं विचार्य विचलिता जाता। इदानीं वैवाहिकसमारोहेषु विशिष्टव्यञ्जनानां व्यवस्थायां कियद्धनं जलमिव प्रवाह्यते इति प्रबन्धका एव जानन्ति। क आगतः केन भोजनं कृतं इति कोऽपि न जानाति। एवमेव सज्जाप्रबन्धेषु प्रसाधनसामग्रीषु च धनस्य अतीव अपव्ययो भवति। पूर्वं विवाहप्रबन्धेषु व्यस्ता या नार्य आत्मानमपि व्यस्मरन् ताः सम्प्रति सौन्दर्यप्रसाधन केन्द्रेषूपविष्टा महतो धनस्य क्षतिं कुर्वन्त्यो दृश्यन्ते। कदाचित् तु सौन्दर्यप्रसाधनकेन्द्रे सज्जायै उपविष्टायाः नववध्वाः प्रतीक्षायां वरयात्रिणो वरश्च प्रवेशद्वारि स्थिता उपेक्षिता इव आत्मनो मन्यन्ते। अद्यत्वे मङ्गलगीतानां स्थाने कर्णकुहरे विष्फारयन् डी.जे. इति ध्वनिप्रदूषणं च प्रसारयति। विवाहमण्डपे सप्तपदीसमारोहस्य कल्याणाय कल्पितो विधिरधुना औपचारिकोऽभवत्। केवलं बाह्यं चाकचक्यमेव विवाहस्य श्रेष्ठतां प्रतिपादयति। वैदिककाले विवाहसंस्कारे बाह्याडम्बरस्य प्रवेशो नासीत्। विवाहसंस्कारः सर्वथा पवित्रधर्मसंस्काररूपेण सम्मानितः पावन यज्ञ इव आदरणीयोऽभवत् परिवार-द्वयस्य स्नेहमेलनम् नवयुगलमध्ये प्रेम्णः प्रतीक-मिवामन्यत। नवयुगलं विवाहकाले न केवलं सप्तवचनैरेव प्रतिबद्धं भवति अपितु प्राणैरपि तौ बध्येते। कन्यायाः पितुः सम्मत्या वरो विवाहसंस्कारस्य कृते नवजीवने प्रवेशाय इष्टमित्र-परिवारजनैः सह कन्यायाः गृहमागच्छतिस्म तत्र समुचितादरेण सःवृतो वरः पाणिग्रहण समये कथयति स्म-

गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः।<br>
भगो अर्यमा सविता पुरन्धिर्मह्यंत्वा दुर्गार्हपत्याय देवाः।।

ऋ. 10/85/36

ततः कन्यायाः पिता अग्रेः समक्षं सम्बन्धिनां इष्ट-मित्राणाञ्च सन्निधौ स्वसामर्थ्यानुसारेण वस्त्राभरणैश्च कन्यामलंकृत्य धन्यमात्मानममन्यत तत्रोपस्थिताः सम्बन्धिनो नवयुगलस्य कृते आशीर्वचनानि व्याहरन्। कथितञ्चः -

इहैव स्तं मा वियौष्टं विश्वमायुव्यश्नुतम्।<br>
कीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्व गृहे।।

ऋ. 10/85/42

एवं सर्वथा समाजकल्याणकरो वैदिकविवाह-विधिः पुनः स्मरणीयोऽनुसरणीयश्च वर्तते।

## हिन्दी अनुवाद

कार्तिक शुक्ल एकादशी तिथि के साथ ही हमारे देश में चार महीनों से अवरूद्ध शुभविवाह समारोहों का क्रम पुनः प्रारम्भ हो गया। घर घर में वरपक्ष एवं कन्या पक्ष के माता पिता अपने अपने पुत्र पुत्रियों के विवाह में उत्तम व्यवस्था के लिए तत्पर दिखाई देते है। निमन्त्रण पत्रों की आकर्षकता एवं अपूर्वता के लिए प्रकाशन कार्यो में धन व्यय करने में तनिक भी संकोच नहीं करते हैं। एक पखवाड़े पूर्व मुझे एक निमन्त्रण पत्र प्राप्त हुआ जो रत्नों से जटित था। इससे केवल प्रेषक का वैभव प्रदर्शन मात्र प्रतीत हो रहा था। कहीं कहीं बारात के प्रस्थान के समय साथ चलने वाले बैंड रोशनी के हंडे आतिशबाजी, हाथी, घोडे आदि के प्रदर्शन में बहुत धन का अपव्यय किया जाता है जो समाज में प्रतिस्पर्द्धा का कारण है। कहीं बारात में निर्बाध गति से नाचते हुए नवयुवक युवतियाँ विवाह के शुभमुहूर्त की भी परवाह नहीं करते है। परिणाम स्वरूप बारात के स्वागत के लिए समुत्सुक आगन्तुक एवं सम्बन्धी बारात के आगमन पूर्व ही भोजन करके चले जाते हैं। नगर में जगह जगह बनाये गये राजमहलों के समान सजे हुए विवाह स्थल मध्यमवर्गीय व्यक्तियों को चिन्तित करते हैं। कुछ दिन पूर्व मैं अपनी किसी निर्धन छात्रा के विवाह समारोह में गई थी। वहाँ की भव्य साजसज्जा को देखकर कहीं मैं किसी अन्य समारोह स्थल पर तो नहीं आ गई हूँ, यह सोचकर आगे जाने को उत्सकुक थी इतने में ही विवाह स्थल के प्रवेशद्वार पर परिचित जनों को देखकर मैंने विवाहमण्डप में प्रवेश किया तथा कन्या के पिता के समक्ष आए हुए कष्ट को सोचकर मैं विचलित सी होगई। आजकल विवाह समारोह के अवसर पर विशिष्ट व्यञ्जनों की व्यवस्था में कितना धन व्यर्थ ही व्यय किया जाता है यह प्रबन्धक ही जानते हैं। कौन कब आया है? किसने भोजन किया यह भी कोई नहीं जानता। इसी प्रकार सजावट एवं प्रसाधन कार्यो में भी बहुत धनका अपव्यय होता है। पहले विवाह के प्रबन्धन कार्यों में व्यस्त नारियाँ अपने को भी भूल जाती थी अब नारियाँ इन महत्वपूर्ण अवसरों पर सौन्दर्य प्रसाधन केन्द्रों में जाकर समय एवं महत् धन का अपव्यय करती हैं। कभी-कभी सौन्दर्य प्रसाधन केन्द्र में सज्जा के लिए बैठी हुई नव वधू की प्रतीक्षा में बाराती एवं वर प्रवेशद्वार पर खडे हुए अपने को उपेक्षित समझते हैं। आजकल मंगलगीतों के स्थान पर कानों को फोडने वाली डी.जे. ध्वनियन्त्र की आवाज रात्रि में पडोसियों की नींद में बाधा उत्पन्न करती है तथा ध्वनिप्रदूषण फैलाती है। विवाह के समय वर-वधू के कल्याण के लिए विहित सप्तपदी विधि अब केवल औपचारिक प्रतीत होती है। केवल आडम्बर एवं बाह्य चाकचिक्य ही विवाह की श्रेष्ठता प्रतिपादित करते है। वैदिककाल में विवाह संस्कार विधि आडम्बर से रहित थी। विवाहसंस्कार सर्वथा पवित्र संस्कार के रूप में सम्मानित एवं पावनयज्ञ की भाँति आदरणीय था। विवाह अवसर पर दो परिवारों का मिलन नवयुगल के बीच प्रेम का प्रतीक था। नवयुगल इस अवसर पर न केवल सप्तपदी के वचनों से प्रतिबद्ध होते थे प्राणों से भी बँध जाते थे। कन्या के पिता की सम्मति से वर विवाह संस्कार के लिए नवजीवन में प्रवेश हेतु इष्ट मित्र एवं परिवार जनों के साथ कन्या के घर आता था वहाँ समुचित सम्मान से सत्कृत होकर पाणिग्रहण के समय कहथा था- **हे वधू मैं सौभाग्य के लिए तेरे हाथ को पकड़ता हूँ मुझ पति के साथ जिस प्रकार वृद्धावस्था तक हो सौभाग्य देव नियामक शक्ति जगत्स्रष्टा सबको धारण करने वाला ईश्वर विद्वान् लोग गृहस्थ कर्म के लिए तुम्हें मेरे लिए देते है।**

उसके पश्चात् कन्या का पिता अग्नि के समक्ष इष्टमित्र एवं सम्बन्धियों की सन्निधि में अपनी सामर्थ्यानुसार वस्त्र आभूषणों से कन्या को अलंकृत कर अपने को धन्य मानता था तथा विवाहस्थल पर उपस्थित सम्बन्धी नव युगल को यह आशीर्वाद देते थे। **हे पति-पत्नी इस गृहस्थ आश्रम में ही रहो विभक्त मत हो पूर्ण आयु भोगो, बेटों ओर नातियों से खेलते हुए अपने घर में प्रसन्न रहते हुए।** इसी प्रार समाज के लिए मङ्गलकरी वैदिक विवाह विधि पुनः स्मरणीय एवं अनुसरणीय है।

-सी-276, भाभामार्ग, तिलकनगर, जयपुर

आयुर्वेद-स्तम्भः

# भवेत् प्रतिज्ञाबद्धश्चिकित्सकः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**वर्तमानकाले भिषगातुरयोर्मध्ये नास्ति तादृग्विधः सुमधुरः सम्बन्धः यथा तु पूर्वमासीत्। चिकित्सकस्त्वातुरैर्नैवावलोक्यते समादृतया दृष्ट्या। केवलः व्यवसायात्मक औपचारिक एव सम्बन्धः वर्तते द्वयोर्मध्ये। समयस्यैवैषः प्रभावः। अनुत्सेकेनावहिते-नानन्यमनसा विनीतेनावेक्ष्यावेक्ष्यकारिणाऽनसूयकेन च चिकित्साकर्म कुर्वता भिषजा कदाचिदसाध्ये चातुरस्य प्रमाणे ह्रसिते सति कर्मसिद्धिर्न भवति तथाऽऽतुरस्य सम्बन्धिनः तस्य चिकित्सकस्योपरि प्राणोपघात-कमाक्रमणं कुर्वन्ति। प्रत्याख्यानपूर्वकमपि समाचरणं कुर्वति भिषजि दोषारोपणं कुर्वन्ति, चिकित्सासंभारान् चिकित्सालयश्च त्रोटयन्ति स्फोटयन्ति च।**

वर्तमान काल में चिकित्सक और रोगी के बीच में वैसा मधुर सम्बन्ध नहीं है जैसा पहले था। रोगियों के द्वारा चिकित्सक को आदरपूर्ण दृष्टि से नहीं देखा जाता। दोनों के बीच में केवल औपचारिक व्यवसायात्मक सम्बन्ध ही (वर्तमान में) रहता है। यह समय का ही प्रभाव है। उत्सेकरहित (अभिमान रहित) रहते हुए, सावधानी से, एकाग्रचित्त से, विनम्र भाव से, देख-देख कर कार्य करते हुए के द्वारा (समीक्षापूर्वक सोच-समझकर कार्य करते हुए के द्वारा) ईर्ष्यारहित चिकित्सा कर्म करते हुए वैद्य के द्वारा कभी असाध्य रोगी में और आतुर की आयु के प्रमाण के ह्रास होने पर कर्मसिद्धि नहीं होती है तथा यदि रोगी में विकलता (किसी अङ्ग के कार्य की हानि) या रोगी की मृत्यु हो जाती है तो रोगी के सम्बन्धी उस चिकित्सक के ऊपर प्राणघातक हमला कर बैठते हैं। प्रत्याख्यानपूर्वक (रोगी ठीक नहीं होगा ऐसा कहकर, प्रत्याख्यान मना करना, पीछे हटाना) चिकित्सा करते हुए चिकित्सक पर दोषारोपण करते हैं, चिकित्सा-सामग्री (उपकरण आदि) को और चिकित्सालय को तोडते हैं और फोडते हैं (तोड़-फोड़ करते है)।

**अत एव ह्याचार्येण चरकेण स्पष्टं निर्दिष्टं यदसाध्यस्य रुग्णस्य कदाचिदपि चिकित्सा न कर्तव्या। अनुपकरणवता योग्यौषधविरहितेनोपयुक्तेन परिचारकेण साहाय्यमप्राप्नुवता चिकित्सकेन कदाचिदप्यसाध्यव्याधिग्रस्ते रुग्णे चिकित्सा न करणीया। आचार्यः चरकः कथयति, यत्-**

**अर्थविद्यायशोहानिमुपक्रोशमसंग्रहम्।**
**प्राप्नुयान्नियतं वैद्यो योऽसाध्यं समुपाचरेत्।।**

(च.सू. 10/8)

**प्रचीनकाले तु जनाः सामान्यतया जनापवादात्मकमेवोपक्रोशं कृत्वा चिकित्सकस्य निन्दां कुर्वन्ति स्म, किन्तु वर्तमानकाले तु निन्दामपि कुर्वन्ति हिंसास्वरूपात्मकं च रोषमपि प्रकटयन्ति। अत एव क्रियापथमतिक्रान्तं सर्वमार्गानुसारिणमौत्सुक्यारति- संमोहकरमिन्द्रियनाशनं सुसंवृद्धं सारिष्टं व्याधिं कदापि नैवोपचरेत्। यद्यप्याचार्याः निर्दिशन्ति यदसाध्यस्य व्याधेरप्युपचारं कृत्वा रुग्णस्य पीडायां न्यूनता करणीया, चिकित्सकस्य दायित्वं वर्तत एतत्। अत एव ते कथयन्ति यत् प्रत्याख्याय समाचरेत्।**

इसलिए ही आचार्य चरक ने स्पष्ट निर्देश दिया है कि असाध्य रोगी की कभी भी चिकित्सा नहीं करनी चाहिए। बिना उपकरण वाले, योग्य औषध से रहित के द्वारा तथा उपयुक्त (योग्य) परिचारक की सहायता जिसको प्राप्त नहीं है ऐसे चिकित्सक के द्वारा कभी भी असाध्य व्याधि से ग्रस्त रोगी में (या रोगी की) चिकित्सा नहीं करनी चाहिए। आचार्य करते हैं कि-

जो वैद्य असाध्य का उपचार करता है वह निश्चित रूप से अर्थ (धन), विद्या, यश और उपक्रोश (जनापवाद) तथा चिकित्सा के लिए रोगियों का न आना (असंग्रह) प्राप्त करता है।

प्राचीनकाल में तो लोग सामान्यता जनापवाद (लोगों में निन्दा) रूपी उपक्रोश को ही कर के चिकित्सक की निन्दा करते हैं। लेकिन वर्तमानकाल में तो निन्दा भी करते हैं और हिंसास्वरूपक रोष भी प्रकट करते हैं। इसलिए जो रोग क्रियापथ का अतिक्रमण कर चुका है (जिसमें चिकित्सा-क्रिया का प्रभाव न होता हो), जो रोग सर्वमार्गानुसारी हो, उत्सुकता (उत्कण्ठा) से युक्त, बेचैनी करने वाला, संमोह (मूर्च्छा) करने वाला इन्द्रियों को नष्ट करने वाला, बहुत बढा हुआ और अरिष्ट सहित रोग की चिकित्सा कभी भी नहीं करनी चाहिए। यद्यपि आचार्य कहते हैं फिर असाध्य व्याधि का उपचार करके रुग्ण की पीडा में न्यूनता करनी चाहिए, यह चिकित्सक का दायित्व है। इसलिए वे कहते हैं कि प्रत्यारव्यान करके (मना करके) उपचार करना चाहिए।

**यदा हि चिकित्सक उपचारं न करोति तदा तु रुग्णस्य तत्सम्बन्धिजनानामेव च हानिर्भवति, यतो हि कदाचिद्विभिन्नैः कष्टकारकैरूपद्रवसमैर्लक्षणैः पीडितः रुग्णोऽरिष्टलक्षणाभासवत् प्रतिभाति, वस्तुतस्तु सोऽरिष्टलक्षणयुक्तो न भवति तदा दक्षेण चिकित्सकेन चिकित्सितः स्वस्थतां लभते। किन्तु जनानामीदृग्विधं**

**हिंसात्मकं व्यवहारं दृष्ट्वा दक्षा अपि शालीनाश्चिकित्स-काश्चिकित्सां न कुर्वन्ति। अनेन शनैः शनैरसाध्यतामु-पगतः स रुग्णः पञ्चत्वमुप-गच्छति। महत्कष्टस्य दुःखस्य च विषयोऽस्त्येषः। अत्र राज्यसर्वकारेण किञ्चित् करणीयं वर्तते। चिकित्सकाः संरक्षणीयाः रुग्णस्य परिकरा अनुशासितव्याः। आयुर्वेदीयशास्त्रेषु तु चण्डानाम-धीराणां द्वेषशीलानां कृतघ्नानां तु 'चिकित्सा न विधेया' इति निर्देशः कृतः। यथा हि -**

**त्यजेदार्तं भिषग्भूपैर्द्विष्टं तेषां द्विषं द्विषम्।**
**हीनोपकरणं व्यग्रमविधेयं गतायुषम्।**
**चण्डं शोकातुरं भीरुं कृतघ्नं वैद्यमानिनम्।।**

**( अ.हृ.सू. 1/34-35 )**

**वर्तमानकाले बहवो वरिष्ठाः विशेषज्ञाश्चिकित्सका उपर्युक्तस्य निर्देशस्य परिपालनं प्रत्यक्षरूपेण परोक्षरूपेण च कुर्वन्ति। कदाचिन्न्यायालयोऽपि चिकित्सकान दण्डयति। यदि तेऽनवहिताः लोलुपाः मिथ्याकर्म विकुर्वाणाः सन्ति तदा तु ते दण्डार्घः सन्त्येव। किन्तु कदचित् सर्वथा दक्षाः विशेषज्ञा अवहिताः शौचाचारशीला अपि चण्डानां क्रोधसंयुक्तानां निकटसम्बन्धिनश्च मृत्युकारणात् शोकसन्त्रस्तानां विवेकशून्याजां जनानां कोपभाजनं भवन्ति तदा ते कस्य शरणं गच्छेयुरित्यपि निर्धारणीयं वर्तते।**

निश्चित ही जब चिकित्सक उपचार नहीं करता है तब तो रोगी की और उसके सम्बन्धियों की ही हानि होती है। क्योंकि कभी विभिन्न कष्टकारक उपद्रवों के समान लक्षणों से पीडित रोगी अरिष्ट लक्षणों का आभास कराते हुए की तरह दिखाई देता है, वस्तुतः तो वह अरिष्ट लक्षणयुक्त नहीं होता है तो वह दक्ष चिकित्सक से चिकित्सा करवाने पर स्वस्थता को प्राप्त करता है। लेकिन लोगों के इस प्रकार के हिंसात्मक व्यवहार को देखकर दक्ष भी शालीन चिकित्सक चिकित्सा नहीं करते हैं। इस से वह रोगी धीरे-धीरे असाध्यता को प्राप्त कर मृत्यु को प्राप्त हो जाता है। यह अत्यधिक कष्ट का और दुःख का विषय है। यहाँ (इस विषय में) राज्यसरकार के द्वारा कुछ करणीय है। चिकित्सकों को संरक्षण देना चाहिए। रुग्ण के परिजन अनुशासित किए जाने चाहिए। आयुर्वेदीय शास्त्रों में तो चण्ड (उग्र, क्रोधी) धैर्यरहित, द्वेष करने के स्वभाव वालों की कृतघ्न लोगों की 'चिकित्सा नहीं करनी चाहिए' यह निर्देश किया गया है। जैसे -

चिकित्सक और राजाओं से जो द्वेष करता है अथवा चिकित्सक या राजा जिससे द्वेष करते हैं, अपने से (स्वयं से) जो द्वेष करता है, जिसके पास चिकित्सा के साधन नहीं हैं, जो अत्यधिक व्यग्र है, जो चिकित्सक की आज्ञा को नहीं मानता है तथा जिसकी आयु समाप्त हो गई है, चण्ड (क्रोधी), शोकग्रस्त, डरपोक, किये हुए की कृतज्ञता न मानने वाला (कृतघ्न) जो चिकित्सक न होते हुए भी अपने को चिकित्सक न मानता है, इस प्रकार के रोगी की चिकित्सा चिकित्सक न करें।

वर्तमान काल में अनेक वरिष्ठ विशेषज्ञ चिकित्सक उपर्युक्त निर्देश का परिपालन प्रत्यक्ष और परोक्ष रूप से करते है। कभी-कभी न्यायालय भी चिकित्सकों को दण्डित करता है। यदि वे असावधान हैं और लालची हैं तथा मिथ्याकर्म करने वाले हैं तब तो वे निश्चितरूप से दण्ड के योग्य हैं ही। किन्तु कभी-कभी सर्वथा दक्ष, विशेषज्ञ, सावधान, पवित्र आचरण वाले भी उग्र और क्रोध से युक्त तथा निकट सम्बन्धी की मृत्यु के कारण से शोक से पीडित तथा विवेकशून्य लोगों के कोपभाजन हो जाते हैं तब वे किसकी शरण में जावे, यह भी निर्धारण करने योग्य है।

**प्रतिवर्षं दीपावलीतः दिनद्वयपूर्वं 'धन्वन्तरि-त्रयोदशी' नामकस्य पर्वणःआयोजनं कुर्वन्ति जनाः। दिवसेऽस्मिन् सामान्याः जनाः केवलं भौतिक-समृद्धेः प्रतीकस्य धनस्यैवाकांक्षां कुर्वाणाः धनस्य देवस्यैव पूजां कुर्वन्ति। किन्तु भिषजोऽन्ये च तज्ज्ञाः विशिष्टाः जनाः आरोग्यस्यैवाकांक्षां प्राथमिकरूपेण कुर्वाणाः प्राणैषणास्वरूपस्यावाप्त्यर्थमारोग्यस्य देवतां धन्वन्तरि-मर्चयन्ति। दिवसेऽस्मिन् भवेत् प्रतिज्ञाबद्धश्चिकित्सकः' यदहं चिकित्सकस्य नीतिनिर्देशकाः ये सन्ति तेषां परिपालनं करिष्यामि। प्राथमिकरूपेणाचार्येण वाग्भटेन निर्दिष्टं यत् चिकित्सा कदापि निष्फला न भवति। यथा हि-**

**क्वचिद्धर्मः क्वचिन्मैत्री क्वचिदर्थः क्वचिद् यशः।**
**कर्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला।।**

**( अष्टाङ्गसंग्रहः )**

प्रतिवर्ष दीपावली के दो दिन पहले लोग 'धन्वन्तरि-त्रयोदशी' नामक पर्व का आयोजन करते हैं। इस दिन सामान्य लोग केवल भौतिक समृद्धि के प्रतीक धन की ही आकांक्षा करते हुए धन के देवता की ही पूजा करते हैं। किन्तु वैद्य और अन्य विशेषज्ञ विशिष्ट जन आरोग्य की ही प्राथमिक रूप से आकांक्षा करते हुए प्राणैषणा (जीने की इच्छा) स्वरूप की प्राप्ति के लिए आरोग्य के देवता धन्वन्तरि की पूजा करते हैं। इस दिन 'चिकित्सक प्रतिज्ञाबद्ध होवें' कि मैं चिकित्सक के जो नीति-निर्देशक हैं उनका परिपालन करूँगा। प्राथमिक रूप से आचार्य वाग्भट ने निर्दिष्ट किया है कि चिकित्सा कभी भी निष्फल नहीं

होती है, जैसे- (चिकित्सा करने पर) कहीं धर्म, कहीं मैत्री, कहीं धन, कहीं यश और कहीं केवल कर्माभ्यास ही होता है, चिकित्सा कभी भी निष्फल नहीं होती है।

**अत एवैतेषां धर्मादीनां प्राप्त्यर्थमावश्यकानां नीतिनिर्देशकसिद्धान्तानां परिपालनं कर्तव्यम्। आचार्यः चरकः संकेतयति यत् चिकित्सकः सत्यवादी मेध्यसेवी, निर्मत्सरः, प्रशान्तः, आर्यप्रकृतिकोऽक्षुद्रकर्मा, धृतिमान्, मेधावी, वितर्कस्मृतिसम्पन्नः, तद्विद्यवृत्तः, उदारसत्त्वोऽनहङ्कृतः, शीलशौचाचारानुरागदाक्ष्य-प्रादक्षिण्योपपन्नोऽध्ययनाभिकामी च भवेत्। भिन्न-भिन्न स्थलेष्वाचार्येण भिन्न-भिन्नरूपेण निर्देशाः संकेतिताः। एकस्मिन् स्थले आचार्यश्चरकः यत् कथयति तस्याभिप्रायो वर्तते यत् कर्मसिद्धिमर्थसिद्धिं यशोलाभं प्रेत्य च स्वर्गमिच्छता भिषजा गोब्राह्मणमादौ कृत्वा सर्व प्राणभृतां शर्माशासितव्यमहरहरुत्तिष्ठता चोपविशता च, सर्वात्मना चातुराणामारोग्याय प्रयतितव्यम्। यद्यप्यन्ये-ऽपि बहवः निर्देशाः व्यासेन समासेन च विभिन्नस्थलेषु संकेतिताः सन्ति पुनरप्येतेषामुपर्युक्तानामेव परिपालनं यदि चिकित्सकः करोति तदप्यलमेव।**

इसलिए इन धर्मादि की प्राप्ति के लिए आवश्यक नत निर्देशक सिद्धान्तों का परिपालन करना चाहिए। आचार्य चरक संकेत करते हैं कि चिकित्सक सत्यवादी, मेधावर्धक द्रव्यों का सेवन करने वाला, ईर्ष्यारहित, प्रशान्त, आर्यप्रकृति वाला, क्षुद्रकर्म न करने वाला, धृतिमान् (धैर्यशाली), मेधावी, वितर्क और स्मृति से युक्त, विषय को जानने वाला, उदारसत्य (उदारमन वाला), अहङ्काररहित, शील, पवित्रता, सदाचार (रोगी में) अनुराग रखने वाला, प्रवीण, सर्वथा अनुकूल रहने वाला, अध्ययन करने की इच्छा रखने वाला होना चाहिए। भिन्न-भिन्न स्थलों पर आचार्य ने भिन्न-भिन्न रूप से निर्देश संकेतित किए हैं। एक स्थल पर आचार्य चरक जो कहते हैं उसका अभिप्राय है कि कर्मसिद्धि, अर्थसिद्धि (धनलाभ), यशप्राप्ति करके मृत्यूत्तर स्वर्ग की कामना करते हुए चिकित्सक के द्वारा गो-ब्राह्मण को आगे करके (उनका चिन्तन करके) सम्पूर्ण प्राणियों के कल्याण का चिन्तन उठते-बैठते करते रहना चाहिए, पूर्ण मनोयोग से आतुर के लिए प्रसन्नशील रहना चाहिए। यद्यपि अन्य भी बहुत से निर्देश विस्तार से और संक्षेप में विभिन्न स्थलों पर संकेतिक हैं फिर भी चिकित्सक इन उपर्युक्त निर्देशों का ही परिपालन यदि करता है तो वे भी पर्याप्त ही हैं।

**४०, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

**समस्त देशवासियों को दीपावली की हार्दिक शुभकामनाएें :-**



# कैलाश शर्मा
# महन्त



**मोती डूंगरी गणेश मंदिर ट्रस्ट**
**मोती डूंगरी रोड़, जयपुर**

# Ekal Vidyalaya





**WHAT IS EKAL VIDYALAYA?**
Ekal Vidyalaya means One teacher One School Ekal Vidyalaya is a unique concept that aims to bring education to the doorstep of a village where children are offered five years of schooling and primary health care free of cost.

**SCHOOL STRUCTURE**
One school has 35 to 45 children of age group of 5 to 16. It is often conducted under the shade of big tree or hut.

**TEACHER**
Teacher from local villages are specially trained to become catalysts for change and for building hope for the entire village.

**THE CURRICULUM**
A Panel of Educationists has developed curricula, which is aligned with government prescribed texts and local culture. Emphasis is given on health, hygiene, character and ethical values.

## JANKALYAN PRATHISTHAN

Amrit Bhog Complex, Kalikasthan, Dili Bazar.
Post Box No. 12105, Kathmandu, Nepal
Phone : 00977 14443674, Fax: 009771 4444020

**Contact in Europe**
Mr. Bitthal Maheshwari
Post box No.122703, 55743 Idar-Oberstein Germany
Phone No.00491726699191, 00491726158359
E-Mail : bitthat.m@gmail.com / rcjain43@gtnail.coni


**Mr. Hasmukh Velji Bhai Shah**
19 Chellow Lane, Bedford BD9 6AX, West Yorkshire, (U.K)
Telephone : 00447771765200, 00441727482056 8
E-mail : akhandhind@gmail.com

**Contact in Middle-east**
Mr. Mahesh Devjibhai Sagar, Post Box No. 1428
Manama, Kingdom of Bahrain
Phone No.: 0097339658802, 00971506406697
E-mail : rndevji@batelco.com.bh

भारती के सभी
पाठकों को
दीपावली की हार्दिक
शुभकामनाऐं :-
रमेश मुलतानी
विनोद मुलतानी
0141-2564802
09829014802
09829014602

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17




स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,